CC-0. In Public Domain. Digitization by eGangotri

शब्दे न्दुप्रकाशः

[द्वितीयभागः]

तस्य

कारकाव्ययीभावप्रकरणम्

•

वाराणसेय-नित्यानन्द-वेद-विद्यालय-प्राध्यापकेन

पण्डितश्रीशुकदेवझाशर्मणा

सङ्कलितः

•

[आचार्य-परीक्षोपयोगि-सर्वश्रेष्ठं संस्करणम्]

प्रकाशकः

मास्टर खेलाड़ीलाल संकटाप्रसाद

संस्कृत पुस्तकालय

पो० बा० नं० ९७, कचौड़ीगली,

वा रा ण सी-१

प्रथमं संस्करणम्] १९७० ई० [मूल्यम् ०.

संशोधित मूल्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

5-2-81

* श्रीगणेशाय नमः *

पण्डितश्रीशुकदेवझाशर्मसङ्गृहीतः

शब्देन्दुप्रकाशः

इदमपि सूत्रं क्रियायोगे एव प्रवर्त्तते

'सहयुक्तेऽप्रधाने' इति सूत्रेऽप्रधानग्रहणाभावे 'पुत्रेण सहागतः पिते' त्यत्र पितृशब्दान्न तृतीयापत्तिः, उपपदविभक्तेरिति न्यायेन कारकविभक्तित्वात्तृतीयां बाधित्वा प्रथमाया एव प्रवृत्तेरिति भाष्यात् प्रातिपदिकार्थ इति सूत्रमपि क्रियायोगे एव प्रवर्त्तते। न च घट इत्यादौ प्रथमा न स्यात् क्रियायोगाभावादिति वाच्यम् ? अस्तिर्भवन्तीपर इति भाष्यात् सर्वत्रास्तिक्रियायाः सत्त्वात्। न च त्रयः काला इत्यत्र प्रथमा न स्यात् लडर्थस्य वर्त्तमानत्वस्य भूतभविष्यतोर्बाधितत्वात् सन्तीति क्रियाया अध्याहारासंभवादिति वाच्यम् ? ज्ञायन्ते इत्यध्याहारेणादोषात्।

क्रियायोग इत्यस्य क्रियानिष्ठविशेष्यतानिरूपितसाक्षात्प्रकारताप्रयोजकात् प्रथमेत्यर्थस्वीकारे 'देवदत्तः पचती'त्यादौ देवदत्तादिपदात् प्रथमा न स्यात् तिङर्थकर्त्तृद्वारा देवदत्तस्य क्रियान्वयात्। परम्परया प्रकारताप्रयोजकात् प्रथमास्वीकारे 'देवदत्तस्य पुत्रोऽस्ती'त्यादौ देवदत्तपदात् प्रथमापत्तिः, तस्मान्नाप्राप्तक्रियानिष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकात् प्रथमेत्यर्थो मन्तव्य इति भावः।

प्राचीनमते प्रातिपदिकार्थत्वम्

ननु पञ्चकं प्रातिपदिकार्थ इति पक्षे लिङ्गस्यापि प्रातिपदिकार्थत्वात् सूत्रे लिङ्गग्रहणं व्यर्थमिति चेन्न, नियतोपस्थितिकस्यैव प्रातिपदिकार्थपदेन ग्रहणमिति ज्ञापनाय तस्यावश्यकत्वात्। नियता उपस्थितिर्यस्य स नियतो-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पस्थितिकः । निपूर्वक-यम्धातोः व्यापकत्वमर्थः । क्तप्रत्ययार्थः आश्रयो यस्येति षष्ठ्यर्थो विषयता । व्यापकत्वस्य व्याप्यांशे नित्यसाकांक्षत्वात् किन्निरूपिता व्यापकतेत्याकांक्षायाम् उपस्थितत्वात् उच्चरितप्रातिपदिकनिष्ठ-व्याप्यतानिरूपित-व्यापकतावती या उपस्थितिस्तादृशोपस्थितिनिरूपित-विषयताश्रयोऽर्थः प्रातिपदिकार्थः ।

व्याप्यतावच्छेदकसम्बन्धः समवायः, एवं व्यापकतावच्छेदकसम्बन्धः समवायः । न च समवायेनोच्चारणस्योच्चारयितरि श्रोतरि च तज्जन्योपस्थितेः सत्त्वेन व्यधिकरणत्वात् कथं व्याप्य-व्यापकभाव इति वाच्यम् ? स्वजन्य-श्रावणप्रत्यक्षसमवायित्वसंसर्गस्य व्याप्यतावच्छेदकत्वस्वीकारात् ।

नन्वेवमपि अगृहीतशक्तिकघटपदस्योक्तसम्बन्धेन श्रोतरि सत्त्वेऽपि शक्तिज्ञानाभावेन घटघटत्वादेरुपस्थितेरभावात् कथमुपस्थितेर्व्यापकत्वमिति वाच्यम् ? स्वविषयपदनिष्ठ-शक्तिज्ञानसमवायित्वस्यापि व्याप्यतावच्छेदकसम्बन्धत्वस्वीकारात् ।

न च गृहीतशक्तिकस्यापि पुरुषस्योपेक्षयाऽनुत्पन्नसंस्कारस्य शक्तिज्ञानसत्त्वेऽपि संस्काराभावेनोपस्थितेरभावात् उपस्थितौ व्यापकता कथमिति वाच्यम् ? स्वनिष्ठशक्तिविषयकोद्बुद्धसंस्कारसमवायित्व-स्वविषयप्रत्यक्षसमवायित्वोभयसम्बन्धावच्छिन्न-व्याप्यतायाःस्वीकारेणादोषात् । ननूपस्थितिपदेन स्मृतेर्ग्रहणे तटादिशब्दात् लिङ्गत्रयविषयकोपस्थितेर्युगपद्संभवेन लिङ्गत्रयोपस्थितेर्व्यापकत्वाल्लिङ्गस्यापि प्रातिपदिकार्थत्वाल्लिङ्गग्रहणवैयर्थ्यापत्तिः । उपस्थितिपदेन शाब्दबोधस्य ग्रहणे यद्यपि नोक्तदोषः, शाब्दबोधस्य यत्किञ्चित्विषयकत्वात् । तथापि हरिपदवाच्येन्द्रादीनां प्रातिपदिकार्थत्वानुपपत्तिः विष्णुविषयकशाब्दबोधकाले तदन्यविषयकशाब्दानुदयात् ।

तस्मात् प्रातिपदिकविशिष्टोऽर्थः प्रातिपदिकार्थः । वै० स्वजन्यबोधविषयत्वप्रकारक - तात्पर्यविषयतापर्याप्त्यधिकरणत्व-स्वाभाववत्त्वैतदुभयसम्बन्धेन । अभावश्च—स्वप्रयोज्यधर्मितानिरूपित-प्रकारतावत्त्व-स्वनिष्ठशक्तिविशिष्टावच्छेदकतावद्विषयतावत्त्वैतदुभयसम्बन्धावच्छिन्नप्रतियोगिताकः । शक्तिवै०—स्वविषयविषयतानिरूपित - निरूपकत्वसम्बन्धावच्छिन्नत्व-स्वज्ञानाधीनोपस्थितिप्रयोज्य - शाब्दबोधनिष्ठभेदप्रतियोगितानिरूपितत्वैतदुभयसम्बधेनेति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नवीनमते प्रातिपदिकार्थत्वविचारः

प्रातिपदिकार्थसूत्रे प्रातिपदिकार्थशब्देन प्रवृत्तिनिमित्तं तदाश्रयश्च गृह्यते। अर्थात् द्विकं प्रातिपदिकार्थः। स च मुख्य इवारोपिततदाश्रयोऽपि। अत एव 'गोपी'त्यादौ स्वादिप्रकृतेर्लाक्षणिकत्वेऽपि न दोषः। प्रातिपदिकार्थपदेन प्रवृत्तिनिमित्ततदाश्रयमात्रग्रहणादेव सूत्रे लिङ्गग्रहणं सार्थकं भवति। लिङ्गमात्रस्य "स्वमोर्नपुंसकात्" इत्यादिशास्त्रप्रामाण्येनात्र सूत्रे प्रातिपदिकार्थपदेन ग्रहणे तु प्रातिपदिकार्थत्वेनैव प्रथमासिद्धे लिङ्गग्रहणवैयर्थ्यापत्तिः। न च नियतोपस्थितिकः प्रातिपदिकार्थ इति नियमार्थं लिङ्गग्रहणमिति वाच्यम्? प्रमाणाभावात्।

अन्यत्र-लिङ्गस्य प्रातिपदिकवाच्यत्वादेव "स्त्रियामि"ति सूत्रे स्त्रीत्वे द्योत्ये इत्यर्थो भाष्ये उक्तः। प्रत्ययवाच्यत्वे तु स्त्रीत्वे वाच्ये टावित्यर्थो वाच्यः स्यात्।

न च "तस्माच्छसो नः" इति शास्त्रबलात् लिङ्गस्य विभक्तिवाच्यत्वं कुतो नेति वाच्यम्? तत्सूत्रे 'पुंसी' त्यस्य पुंशब्दस्य प्रकृतित्वे इत्यर्थात्। न च तिङ्कृत्तद्धितसमासनिपाताभिहितकारकवाचिनी प्रथमेत्यर्थकादभिहिते प्रथमेति वार्त्तिकबलात् प्रथमायाः कारकार्थत्वम् प्रातिपदिकार्थमात्रे प्रथमेति दीक्षितमते तन्नेति विरोध इति वाच्यम्? तत्तत्प्रातिपदिकार्थगत-कारकशक्तावन्येनाभिहितायां स्वार्थे प्रातिपदिकात् प्रथमेति वार्त्तिकार्थस्वीकारेण विरोधाभावात्। तटादिशब्दानामपि लिङ्गं वाच्यमेव द्योतकास्तु विसर्गादयः।

अत एव प्रातिपदिकार्थः सत्तेति वृत्तौ प्रतिपादितम्। एवञ्च प्रातिपदिकार्थ इत्यस्यालिङ्गा उच्चैरित्यादयः लिङ्गप्रवृत्तिनिमित्त का: 'स्त्री पुमान् नपुंसकम्' इत्यादयश्चोदाहरणम्। लिङ्गविशिष्टपरिभाषया स्त्रीशब्दोऽपि प्रातिपदिकार्थ इत्यस्योदाहरणम्। वस्तुतस्तु नवीनमतमेव युक्तम्। 'लिङ्ग' इत्यस्य 'कुमारी वृक्षः वनमि' ति भाष्योदाहरणदानात्। प्राचीनमते नियतलिङ्गकत्वेन प्रातिपदिकार्थ इत्यस्यैवोदाहरणमिति भाष्यासङ्गतिस्सपष्टैवेति भावः।

प्रवृत्तिनिमित्तत्वम्

वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारताश्रयत्वम्। शब्दाश्रयत्वस्याकाशपदप्रवृत्तिनिमित्तत्ववारणाय वाच्यत्वे सतीत्युक्तम्। वच्यावृत्तित्वनिवेशात् आकृतेर्न गवादिपदप्रवृत्तिनिमित्तत्वम्। वाच्योपस्थितिप्रकारता-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रयत्वनिवेशात् घटादिपदवाच्ये घटादिपदवाच्यवृत्तौ समवायसम्बन्धे नातिव्याप्तिः। न च पुंस्त्वत्वादावतिव्याप्तिः, वाच्यत्वादित्रयस्य तत्र सत्त्वादिति वाच्यम् ? स्वजन्यशाब्दबोधीयप्रकारताश्रयत्वं स्वप्रयोज्यधर्मितानिरूपितप्रकारत्वाभाववत्त्वमेतदुभयसम्बन्धेन प्रातिपदिकविशिष्टत्वं प्रवृत्तिनिमित्तत्वमिति स्वीकारात्।

अभावश्च —आश्रयत्व-अवच्छेदकत्वान्यतरसम्बन्धावच्छिन्नप्रतियोगिताक इति भावः।

द्रोण इति

द्रोणशब्दात् परिमाणे प्रथमायां स्वर्थे परिमाणे द्रोणशब्दस्याभेदसम्बन्धेनान्वयः। स्वर्थपरिमाणस्य परिच्छेद्यपरिच्छेदकसम्बन्धेन व्रीहौ। तथा च द्रोणाभिन्नं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरिति बोधः। न च प्रातिपदिकार्थत्वादेव प्रथमासिद्धौ सूत्रे परिमाणग्रहणं व्यर्थमिति वाच्यम् ? नामार्थयोरभेदातिरिक्तसम्बन्धोऽव्युत्पन्न इति न्यायात् परिच्छेद्यपरिच्छेदकभावेन व्रीहावन्वयानुपपत्तेः। एवञ्च प्रातिपदिकार्थत्वात् प्रथमासिद्धावपि परिच्छेद्यपरिच्छेदकभावेनान्वयार्थं परिमाणग्रहणमिति प्राचां मतम्।

नवीनमते द्रोणत्वादिप्रवृत्तिनिमित्तकानां द्रोणादिशब्दानां परिमाणत्वेन परिमाणमपि लिङ्गवदधिकं भासते इति लिङ्गवत् प्रातिपदिकार्थत्वाभावात् प्रथमासिद्धये परिमाणग्रहणम्। न च द्रोण इत्यनेनैव परिमाणस्योक्तत्वात् उक्तार्थानामप्रयोग इति न्यायेन द्रोणः परिमाणमिति प्रयोगो न स्यादिति वाच्यम् ? 'द्वौ ब्राह्मणौ' इतिवदुपपत्तेः, द्रोणशब्दस्यानेकार्थत्वाद्वा। प्राचीनमते 'राज्ञः पुरुषमानये' तिवत् 'द्रोणो व्रीहिमानये' ति प्रयोगापत्तिः, द्रोणव्रीह्योः सामानाधिकरण्याभावात्। किञ्च, तिङ्समानाधिकरणे प्रथमेति वार्त्तिकैकवाक्यतया परिच्छेद्यपरिच्छेदकभावेनान्वये 'द्रोणो व्रीहिरि', त्यत्र द्रोणशब्दात् प्रथमा न स्यात्, तिङ्सामानाधिकरण्यविरहात्।

न च यदा मेये द्रोणादीनां वृत्तिस्तदा मेयस्यानेकत्वेन परिमाणमात्रपरत्वे मेयस्यावोधेन व्यभिचारात् मेयस्य नियतोपस्थितिकत्वाभावेन प्रातिपदिकार्थत्वाभावात् प्रमीयते यदिति कर्मव्युत्पत्त्या प्रमेयार्थकं परिमाणग्रहणमिति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वाच्यम् ? सिंहो माणवक इत्यसिद्धयापत्तेः, सिंहसदृशस्य नियतोपस्थितिकत्वाभावात् । न च शक्यार्थं प्रथमया पदसाधुत्वं विधाय ततो लक्षणेति न दोष इति वाच्यम्, 'द्रोणो व्रीहिरि'त्यत्रापि तथैवोपपत्तेः । एवञ्च परिमाणग्रहणं व्यर्थमेव स्यात् । नियमांशनिवेशे मानाभावाच्चेति दिक् ।

एक इति

प्रातिपदिकार्थ इति सूत्रेऽनभिहिते इत्यस्य सम्बन्धादनभिहिते प्रातिपदिकार्थे वर्त्तमानात् प्रातिपदिकात् प्रथमेत्यर्थे सूत्रस्यैव वैयर्थ्यापत्तिः, प्रातिपदिकेन सर्वत्र प्रातिपदिकार्थस्याभिहितत्वात् । तस्मात् द्व्यकयोरित्यादिनैकवाक्यतया प्रातिपदिकार्थे वर्त्तमानात् प्रातिपदिकादनभिहिते एकत्वे प्रथमाया एकवचनमित्यर्थे एकशब्देनैकत्वस्योक्तत्वात् उक्तार्थानामिति न्यायेन प्रथमा न स्यात् । एकशब्दात् द्विवचनादयस्तु न, प्रातिपदिकप्रतिपादितसंख्याविशिष्टे संख्यान्तराभावात् अनन्वितार्थकविभक्त्यपेक्षयाऽनुवादकविभक्तेरेव न्याय्यत्वाच्च । वचनग्रहणसत्त्वे तु तत्सामर्थ्यात् प्रथमा भवति । न च राम इत्यादावपि प्रातिपदिकेन संख्याया उक्तत्वात् कथं प्रथमेति वाच्यम् ? द्योतकविभक्तिसमभिव्याहारानपेक्षया यत्र संख्याया भानम् तादृशैकत्वादावनभिहिते इत्यर्थस्वीकारादिति भावः ।

मात्रग्रहणफलम्

ननु 'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ती'ति न्यायात् स्वादिसूत्रेण प्रथमासिद्धौ प्रातिपदिकार्थ इति सूत्रं नियमार्थं प्रातिपदिकार्थे एव प्रथमेति प्रत्ययनियमपक्षे मात्रग्रहणं व्यर्थम्, नियमेनैव मात्रशब्दार्थलाभादिति चेन्न, यथा कर्मण्येव द्वितीयेति नियमेन कर्मत्वाज्ञानसमानकालिकार्थान्तरस्य व्यावृत्तिर्भवति, न तु कर्मत्वज्ञानसमानकालिकार्थान्तरस्य । अत एव 'गां पयो दोग्धी'त्यादावपादानत्वादिबोधेऽपि द्वितीया भवति । अर्थात् कर्मणि सत्येव द्वितीया न तु कर्माभावे इति ।

एवमनेनापि प्रातिपदिकार्थसत्त्वे एव प्रथमा न तु प्रातिपदिकार्थाभावे इति नियमः स्यात्तथा चानार्थकनिपातेभ्यः प्रथमा न स्यात् । एवञ्च तादृशनिपातसमभिव्याहारे सपूर्वायाः प्रथमेत्यादिशास्त्रप्रवृत्तिर्न स्यात् । मात्रग्रहणसत्त्वे तु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कर्मादियोग्यार्थकप्रातिपदिकाच्चेत् प्रथमा तर्हि तद्रहितस्वार्थे इत्यर्थात् स्वादि-सूत्रेणानर्थकनिपातेभ्यः प्रथमा सिध्यति। मात्रग्रहणात् सूत्रकारस्य प्रत्ययनियम-पक्षोऽभिमतः। कर्मणि द्वितीयैवेत्यर्थनियमाश्रित्य मात्रग्रहणं सम्बोधने चेति सूत्रं लिङ्गादिग्रहणञ्च भाष्ये प्रत्याख्यातमिति भावः।

सम्बोधने च

सम्बोधने वर्त्तमानात् प्रातिपदिकात् प्रथमेत्यर्थः। अभिमुखीकरणं सम्बोध-नम्। सम्बोधनविभक्त्यन्तफलन्तु प्रवृत्तिनिवृत्ती। यथा 'राम मां पाही' त्यादौ प्रवृत्तिः, 'हे चैत्र अग्रे व्याघ्रोऽस्ती' त्यादौ निवृत्तिः। सम्बोध्यतावच्छेदकरूपेण सम्बोध्यस्य सिद्धिं विना सम्बोधनासंभवात् अनुवाद्ये एव सम्बोधनविभक्तिः। अत एव विधेयभूतक्रियायामुद्देश्यतया सम्बोधनविभक्त्यर्थान्वयः। अत एव राजत्वसिद्धे सति 'राजन् युध्यस्व' अन्यथा 'राजा भव युध्यस्वे'ति प्रयोगः संगच्छते। नन्वेवं 'व्रजानि देवदत्ते' त्यत्र व्रजने देवदत्तस्य प्रवृत्तिनिवृत्त्यो-रभावात् कथं सम्बोधनविभक्तिरिति चेन्न, जानीहीत्यध्याहृत्य व्रजनस्य कर्मत्वात् देवदत्तस्योद्देश्यत्वादुभयोः समानवाक्यस्थत्वेनादोषात्। एकतिङ् वाक्यमित्यस्य श्रूयमाणैकतिङित्यर्थस्वीकारान्निघातसिद्धिः। एवञ्च नवीनमते प्रकृतवाक्यार्थविषयकबोधाश्रयत्व-प्रकारकेच्छोद्देश्यत्वं सम्बोधनविभक्तिद्योत्यम्। द्योत्यार्थस्य सर्वत्र विशेषणत्वात् विभक्त्यर्थस्याभेदेन प्रकृत्यर्थेऽन्वयः। तथा च 'राम मां पाही'ति वाक्यात् प्रकृतवाक्यार्थविषयकबोधाश्रयत्वप्रकारकेच्छो-द्देश्याभिन्न-रामोद्देश्यकप्रवर्त्तनाविषयीभूतं मत्कर्मकं त्वत्कर्त्तृकं रक्षण-मिति बोधः।

प्राचीनमते विभक्तिर्वाचिका, वाच्यार्थस्य विशेष्यत्वम्। सम्बोधनपदस्य बोधे-आश्रयत्वे इच्छायामुद्देश्यत्वे च खण्डशः शक्तिः। रामनिष्ठोद्देश्यता-निरूपकेच्छानिरूपित-प्रकारताश्रयीभूतं यदाश्रयत्वं तादृशाश्रयत्वनिरूपकबोध-विषयीभूतं मत्कर्मकं त्वत्कर्त्तृकं रक्षणमिति बोधः।'

वस्तुतस्तु प्राचीनमतमेव युक्तम्, प्रवृत्तिनिवृत्त्योरभावेऽपि सम्बोधनं भवतीति सिद्धान्तात् 'व्रजानी' त्यत्र 'जानीही' त्यनध्याहारे लाघवात्। नव्यमते विभक्त्यर्थस्य प्रकृत्यर्थे प्रकारतयाऽन्वयः। प्राचीनमते विभक्त्यर्थे प्रकृत्यर्थस्य प्रकारतयाऽन्वय इति विशेषः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कारके

करोति-क्रियां निर्वर्त्तयतीति व्युत्पत्तिप्रदर्शनपरभाष्यात् क्रियाजनकत्वं कारकत्वम् । 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छती'त्यादौ ब्राह्मणस्य न कारकत्वम्, कुलालजनकत्वेव पुत्रेणान्यथा सिद्ध्या कारकत्वाभावात् । अत एव कारकाणां क्रियायामेवान्वयः । स्वस्वावान्तरक्रियाद्वारा प्रधानक्रियानिष्पादकत्वात् सर्वेषां कारकाणां क्रियाजनकत्वम् । न च सम्प्रदानासत्त्वेऽपि तज्ज्ञानमात्रेणैव तदुद्देशेन दानदर्शनात् सम्प्रदानस्य क्रियाजनकत्वाभावेन कथं कारकत्वमिति वाच्यम् ? सम्प्रदानज्ञानवर्त्तिन्यादान जनकताया सम्प्रदाने आरोपेणोपपत्तेः । न च घटस्यानुत्पत्तिदशायां घटं करोतीति प्रयोगो न स्यात् तदानीं घटाभावेन क्रियाजनकत्वाभावात् । एवं 'घटं स्मरती' त्यादौ घटे स्मरणजनकत्वाभावात् कारकत्वं न स्यादिति वाच्यम्, बौद्धघटादिकमादाय तदुपपत्तेः ।

'एवं स्तोकं पचती'त्यादौ फलस्यापि क्रियाजनकत्वेन कारकत्वम । क्रियान्वयित्वं कारकत्वम् इति प्राचीनोक्तं न युक्तम्, कारकाणां क्रियान्वय इत्यतो बोधानुपपत्तेः । उद्देश्यतावच्छेदकविधेययोरैक्यात् । क्रियाजनकत्वं कारकत्वमिति स्वीकारे कारकाणां क्रियाजनकत्वमित्यत्र न दोषः । विधेयकोटावधिकावगाहिनः शाब्दबोधस्य स्वीकारात् । न च 'मातुः स्मरती' त्यादौ सम्बन्धत्वेन विवक्षायामपि क्रियाजनकत्वसत्त्वात् कारकत्वापत्तिरिति वाच्यम् ? क्रियाजनकत्वेन विवक्षितत्वं कारकत्वमिति स्वीकारादिति भावः ।

कर्त्तुरीप्सिततमं कर्मेति

आप्नोतेः सम्बन्धोऽर्थः । सम्बन्धश्च व्यापारविशिष्टफलाश्रयत्वरूपः । वै० स्वप्रयोज्यत्व-स्ववाचकधातुवाच्यत्वोभयसम्बन्धेन । कर्तृपदार्थस्य वृत्तित्वसम्बन्धेन व्यापारेऽन्वयः । सनर्थेच्छायां व्यापारविशिष्टफलाश्रयत्वस्य प्रकारतयाऽन्वयः । उद्देश्यत्वं क्तप्रत्ययार्थः । एवञ्च कर्त्तृवृत्तिप्रकृतधात्वर्थप्रधानीभूतव्यापारविशिष्टफलाश्रयत्वप्रकारिकेच्छोद्देश्यं कर्मेति सूत्रार्थः ।

प्रकृतधात्वर्थनिवेशात् 'माषेष्वश्वं बध्नाती' त्यत्र न माषाणां कर्मत्वम् गलविलाधःसंयोगस्य तादृशव्यापारप्रयोज्यफलत्वाभावात् । प्रधानीभूतेति निवेशात् 'अग्नेर्माणवकं वारयती'त्यादावग्नेर्न कर्मत्वम्, माणवकवृत्तिव्यापारस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रधानीभूतत्वाभावात् । 'गां पयो दोग्धी' त्यादौ पयसः कर्मत्वसिद्धये प्रयोज्यत्व-निवेशः । अन्यथा विभागस्य द्वितीयव्यापारजन्यत्वाभावात् कर्मत्वं न स्यात् । स्ववाचकधातुवाच्यत्वनिवेशात्—यदा पुष्ट्यर्थं माषक्षेत्रेऽश्वं बध्नाति तदापि 'माषेष्वश्वं बध्नाती' त्यत्र न माषाणां कर्मत्वम्, गलविलाधःसंयोगस्य प्रकृत-धातुवाच्यत्वाभावात् । न च 'काशीं न गच्छती'त्यादौ काश्याः संयोगा श्रयत्वाभावात् कथं कर्मत्वमिति वाच्यम् ? नञ् समभिव्याहारे संयोगाभाव-स्यापि धात्वर्थत्वात् । नन्वेवमपि तण्डुले विक्लिनिर्जायतामित्यादौ फल-विशेष्यिका यत्रेच्छा तत्र कथं कर्मत्वमिति चेन्न, कर्तृवृत्तिव्यापारविशिष्टफल-प्रतियोगिकफलतावच्छेदसम्बन्धानुयोगितासमानाधिकरणविषयताश्रयीभूतं कर्मे-त्यर्थस्वीकारात् ।

स्तोकं पचति

ननु 'स्तोकं पचती'त्यादौ स्तोकपदार्थस्य विक्लित्तौ-अभेदान्वयात् । विक्लितेः धात्वर्थत्वेन प्रातिपदिकत्वाभावात्तत्समानाधिकरणस्तोकपदात् कथं द्वितीया, तस्य फलरूपत्वेन फलाश्रयत्वाभावादिति चेन्न व्यपदेशिवद्भावेन फलस्यापि फलाश्रयत्वात् । फलघटितत्वेन फलाश्रयत्वस्यातिदेशे व्यपदेशि-वद्भावप्रवृत्तिः सुलभा । अथवा व्यपदेशिवद्भावनेत्यस्य क्रियाविशेषणानां कर्मत्वं क्लीबत्वमिति वचनस्योपलक्षणत्वम् । अथवा पच्यादेः विक्लित्युत्पत्त्यनुकूल-व्यापारार्थकत्वस्वीकारान्न दोषः । न चैवं कालिकसम्बन्धेन विक्लितेः पाषाणे-ऽपि सत्त्वात् 'पाषाणं पचती'ति प्रयोगापत्तिरिति वाच्यम्, फलतावच्छेदक-सम्बन्धेन फलाश्रयस्य कर्मत्वविधानात् ।

क्तप्रत्ययोपात्तवर्त्तमानत्वमिति

ननु ईप्सितशब्दे 'मतिबुद्धिपूजार्थेभ्यश्चेत्यनेन' वर्त्तमाने कर्मणि क्ते कृते कर्तृवृत्तिव्यापारप्रयोज्यफलाश्रयत्वप्रकारिका या वर्त्तमानकालिकीच्छा तादृशे-च्छोद्देश्यं कर्मेत्यर्थः स्यात् । तथा च 'कटं कृतवान् कटं करिष्यतीत्यादौ' कर्मत्वानुपपत्तिः, वर्त्तमानकालिकेच्छाविरहादिति चेन्न, क्तप्रत्ययोपात्तवर्त्तमान-त्वस्याविवक्षणेनादोषात् । न चैवं 'क्तस्य च वर्त्तमाने' इत्यनेन षष्ठी न स्यादिति वाच्यम्, तस्यापत्यमित्यत्र लिङ्गवचनयोरुपलक्षणतया भानेऽप्युद्देश्यतावच्छेदक-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitized by eGangotri

विशेषणतया भानाभाववत् "कर्त्तुरिति' सूत्रे वर्त्तमानत्वस्योद्देश्यतावच्छेदक-विशेषणतया भानाभावेऽपि उपलक्षणतया वर्त्तमानत्वस्य भानेन षष्ठ्युपपत्तेरिति भावः।

पयसा ओदनं भुंक्ते

तमपो ग्रहणं यत्रेति बहुव्रीहिणा सूत्रे ईप्सिततमग्रहणं किमर्थम्, ईप्सित-शब्दस्य यौगिकत्वमस्वीकृत्य कर्त्तुरुद्देश्यं कर्मेत्येव सूत्रमस्तु-इति प्रश्नाशयः। कृतभोजनोऽपि बालः पयोलोभेनौदनभोजने प्रवर्त्तते इत्यभिप्रायेण 'पयसा ओदनं भुंक्ते' इत्यत्र पयस उद्देश्यत्वात् परत्वात् कर्मसंज्ञापत्तिः। न चेप्सितशब्दस्य यौगिकत्वं स्वीकृत्य पयसो गलविलाधःसंयोगाश्रयत्वाभावाद्बोधाभावेन सूत्रे तमब्ग्रहणं व्यर्थमिति वाच्यम्? 'अग्नेर्माणवकं वारयती'त्यादावग्नेरपि कर्मत्वापत्तेः।

न च "वारणार्थानामि"ति सूत्रं व्यर्थं स्यादिति वाच्यम्?, अपवादत्वात् माणवकशब्दस्याप्यपादनत्वापत्तेः। अग्नौ न तस्य चारितार्थ्यम् वारिधातू-पस्थाप्य संयोगरूपफलाश्रयत्वेन कर्मसंज्ञाप्राप्त्या सूत्रस्य निरवकाशत्वात्। न च संयोगस्य कर्त्तृव्यापारजन्यत्वाभावात् कथं कर्मत्वमिति वाच्यम्, तमब्ग्रहणा-भावे कर्त्तृवृत्तिव्यापारवाचकधातुवाच्यफलाश्रयस्यैव कर्मत्वविधानात्।

कृते तमब्ग्रहणे तु—ईप्सितमात्रे सावकाशाया अपादानसंज्ञायाः परत्वा-दीप्सिततमे कर्मसंज्ञया बाधान्न दोषः। ईप्सिततमत्वञ्च—प्रकृतधात्वर्थप्रधानी-भूतव्यापारप्रयोज्य-प्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वमिति भावः।

प्राचीनमते इच्छागतप्रकर्षलाभाय तमब्ग्रहणम्। इच्छागतप्रकर्षश्चान्यान-धीनत्वरूपः। एवञ्च कर्त्तृवृत्तिव्यापारवाचकधातुवाच्यफलवत्त्वप्रकारिकाऽन्यान-धीनेच्छा तादृशेच्छोद्देश्यं कर्मेत्यर्थः। कश्चित् पाकं करोति तदानीं द्विदलमग्नौ पतितं केन प्रकारेणौदनं भोक्ष्यामीति विचार्य दुग्धं कृतवान् एतदभिप्रायेण 'पयसा ओदनं भुंक्ते' इति प्रयोगः। अत्र पयस उद्देश्यत्वात् कर्मत्वापत्तिः। तमब्ग्रहणे सति—ओदनभोजनेच्छाधीनत्वेनान्यानधीनत्वाभावान्न दोष इति। तन्न, आत्मानमिच्छत्यादौ कर्मत्वेऽपि 'ओदनं पचती'त्यादौ कर्मत्वानुपपत्तेर-न्यानधीनेच्छाविरहादिति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अभिहिते

'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ती'ति न्यायात् स्वादिसूत्रेण कर्मादौ संख्यायाश्च स्वादीनां सिद्धौ "कर्मणि द्वितीया" द्वेधकयोरित्यादेश्च नियमत्वम् । उभयोरेकवाक्यतापक्षे एकस्मिन् कर्मणि द्वितीयाया एकवचनमित्यर्थे 'कृतः कट' इत्यादावुक्तार्थानामप्रयोग इति न्यायेनैव द्वितीयावारणसंभवादनभिहिताधिकारो व्यर्थः ।

न च 'द्विर्वद्धं सुवद्धमि'ति न्यायेन 'द्वौ ब्राह्मणौ व्यतिलुनीते' इत्यादौ द्योतकवाचकयोर्द्योतकयोश्च समुच्चयवत् प्रकृते द्वितीयापत्तिवारणायानभिहिताधिकार इति वाच्यम् ? 'लक्ष्यानुरोधेनोक्तार्थानामि'ति न्यायानुसरणस्य युक्तत्वात् । कर्मगतैकत्वे विवक्षिते द्वितीयाया एकवचनमित्यर्थे 'कृतः कट' इत्यत्र द्वितीयावारणाय तदधिकार आवश्यकः । सूत्रजन्यबोधे एकत्वस्य प्राधान्येन तस्यानुक्तत्वादुक्तार्थानामिति न्यायाप्रवृत्तेः । अध्यागच्छतीत्यादावनर्थकस्याधिशब्दस्योक्तार्थानामिति न्यायेनाभावमाशङ्क्य अपूपौ द्वौ इत्यादावुक्तार्थानां प्रयोगदर्शनेन समाधानं कृतं भाष्ये । अस्मात् भाष्यात् द्योतकविषयेऽपि तन्न्यायस्य प्रवृत्तिर्भवति । अत एव द्विदशा इत्यादौ समासेन सुजर्थस्योक्तत्वान्न सुजिति भाष्यं संगच्छते ।

शत्य इति

'शतेन क्रीतः शत्योऽश्व' इत्यत्र क्रयकर्मरूपेऽर्थे तद्धितप्रत्ययो विहितस्तथा च क्रयनिरूपितकर्मत्वस्याश्वपदार्थे सत्त्वात् द्वितीयापत्तिवारणायानभिहिताधिकारो व्यर्थः, उद्भूतकर्मणि वर्त्तमानत्वाभावेन द्वितीयाया अप्राप्तेः । 'औपगवः, चित्रगुरि'त्यादौ विग्रहवाक्यात्यथा - सम्बन्धस्य भानं - तथा समुदायशक्त्येति प्राप्तषष्ठीवारणाय तदधिकारः ।

न च सम्बन्धस्य प्रातिपदिकार्थत्वेन शेषत्वाभावात् कथं षष्ठ्याः प्राप्तिरिति वाच्यम् ? संसर्गतावादिमते सम्बन्धस्य संसर्गमर्यादया भानात् प्रवृत्तिनिमित्ततदाश्रयरूपप्रातिपदिकार्थत्वाभावेन शेषत्वात् षष्ठीप्राप्तेः सुलभत्वात् तथा च 'चित्रगुरि'त्यादौ षष्ठीवारणाय तदधिकार आवश्यक इति प्राचां मतम्

वस्तुतस्तु 'कटं भीष्मं कुरु' इत्यत्र कटपदोत्तरद्वितीयया कर्मत्वोक्तत्वा । भीष्मपदात् द्वितीया न स्यादतः तिङ्कृत्तद्धितसमासैरिति परिगणनं कर्त्तव्य-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मित्युक्त्वा तत्प्रत्याख्यानायाभिहितकर्मत्वेन शेषत्वाभावान्नात्र शेषलक्षणा षष्ठी। नापि द्वितीया, अनभिहितकर्मत्वाभावात्। नापि तृतीयादिविभक्तिः, कर्त्राद्यभावात्। नापि प्रथमा तिङ्सामानाधिकरण्यविरहात्।

'अपदं न प्रयुञ्जीत इति' सिद्धान्तात् अनन्वितार्थकविभक्तिकरणापेक्षयाऽनुवादकविभक्तेः न्याय्यत्वेन द्वितीया स्यादेवेति परिगणनं भाष्ये प्रत्याख्यातम्। अनेन भाष्येण चित्रगुरौपगवादौ सम्बन्धस्य प्रकारतयैव भानमिति प्रातिपदिकार्थत्वेन शेषत्वाभावात् षष्ठ्यप्राप्तौ तद्वारणायानभिहिताधिकारो व्यर्थः। तदुक्तं भाष्ये—'चित्रगुरि'त्यादौ षष्ठ्यर्थस्य नियमेन भानात् षष्ठी प्राप्नोतीत्याशङ्क्य, अभिहितः सीऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः सम्पन्न इति प्रथमेत्युक्तम्। एवञ्च विभक्तिवाच्यतावच्छेदकोद्भूतशक्तिमत्त्वेन यत्र कर्मादेर्भानं तत्रैव द्वितीयादिविभक्तिरित्यत्र तात्पर्यग्राहकत्वं तदधिकारस्येति भावः। अत एव 'इष्टः पुत्रः, इष्यते पुत्र' इत्यादौ क्यचमाशङ्क्य स्वशब्देनोक्तत्वान्नेति समाधानं भाष्योक्तं संगच्छते इति दिक्।

प्राप्तानन्दः

प्राप्त आनन्दो यमिति विग्रहतो यत्कर्मकप्राप्तिकर्त्तानन्द इति बोधः। समासतश्च-आनन्दकर्त्तृकप्राप्तिकर्मेति बोधः। तथा च विशेष्य-विशेषणभाव-व्यत्यासेनैवैकार्थीभावः कल्प्यः स्यात्। इष्टापत्तिस्तु न, वृत्तिविग्रहयोः समानार्थत्वभङ्गापत्तेः। न चाख्यातं तद्धितकृतोर्यत् किञ्चिदुपदर्शकं गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः, इति वचनानुरोधेन समानार्थत्वभङ्ग इष्ट एवेति वाच्यम्? बहुव्रीहयुपजीव्यस्यैकधर्मिबोधकत्वरूप—सामानाधिकरण्याभावेन 'प्राप्तभार्यः' इत्यत्र पुंवद्भावानापत्तेः। स्वप्रयोज्योपस्थितीयमुख्यविशेष्यता—समानाधिकरणा या-अभेदसम्बन्धावच्छिन्नविषयता तया साक्षान्निरूपितोपस्थितीयमुख्यविशेष्यतासमानाधिकरणविषयताप्रयोजकत्वमेव सामानाधिकरण्यम्। न च स्वप्रयोज्याभेदसम्बन्धावच्छिन्नविषयतानिरूपितविषयताप्रयोजकत्वरूपसामानाधिकरण्यस्वीकारान्नोक्तदोष इति वाच्यम्? कालाः परिमाणिनेत्यादिसूत्रभाष्योक्तस्य वृत्तिविग्रहयोः समानार्थत्वस्य निर्वाहार्थं वृत्तिविग्रहयोः प्राप्तिकर्त्तानन्द कर्मत्येव बोधः स्वीकर्त्तव्यः। न च कर्मत्वं क्रियानिरूपितं नत्वानन्द-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्रव्यनिरूपितमिति तादृशबोधोऽसङ्गत इति वाच्यम् ? विशेष्ये आनन्दे कर्मता-निरूपकत्ववाधेन विशेषणभूतप्राप्तौ कर्मतानिरूपकत्वसत्त्वेनादोषात् । स्वर्गी-ध्वस्त इतिवत् प्राप्तिरूपविशेषणविशिष्टे निरूपकत्वारोपेण शाब्दबोधः । वस्तु-तस्तु—वृत्तिविग्रहघटकपदयोः समानार्थत्वमिति भाष्याशयकल्पने प्राचीनमतेऽपि न दोष इति दिक् ।

प्रायेणेति

अभिधानं तु प्रायेण तिङ्कृत्तद्धितसमासैरित्यत्र प्रायेणेत्यस्य क्वचिन्नि-पातेनाभिधानम्—यथा 'विषवृक्षोऽपिसंवर्द्ध्य'त्यत्रापिन निपातेना कर्मत्वस्या-भिधानान्न विषवृक्षपदात् द्वितीया । परे तु क्षेतु मिति तुमुनः साधुत्वायेष्यते इत्यध्याहार श्रावश्यकः । अन्यथा क्रियार्थक्रियोपपदत्वाभावाच्छकादियोगा-भावाच्च तुमुन् न स्यात् । एवञ्चेष्यते इति तिङाऽभिधानान्न ततो द्वितीया । एवं क्रमादमुं नारद इत्यत्र नारद इति प्रथमान्तस्य प्रातिपदिकत्वाभावान्न द्वितीया । परिगणनादेव 'अधिहरि' इत्यादौ निपातेनाधिकरणत्वस्योक्तत्वेऽपि 'हरि'शब्दात् सप्तम्युत्पत्तौ समासः सिद्ध्यति । विभक्त्यर्थेऽव्ययीभावसमास-विधानसामर्थ्यात् सप्तमीकल्पनापेक्षया परिगणनत्वकल्पनैव युक्ता । अत एव 'अग्र आं अप' इत्यादौ निपातेनाभिहितेऽपि सप्तमी । किञ्च निपातेना-भिधानेऽपि प्रातिपदिकादुद्भूततत्तच्छक्तिमत्त्वेनैव भानं भवतीति सिद्धान्तात् तत्र विभक्तिः सुलभा । एवञ्च परिगणनप्रत्याख्यानेऽपि न दोष इति भावः ।

अकथितञ्च

सूत्रेऽकथितशब्दोऽसङ्कीर्त्तितपरः । असंकीर्त्तितत्वञ्च—क्वचित् प्रसक्त-स्याप्यपादानत्वादिरूपेणाविवक्षितत्वम्—यथा 'गां दोग्धि पयः ।' क्वचिच्च सर्वथैवापादनत्वादिप्राप्तिराहित्यम्—'यथा बलिं याचते वसुधाम् ।' अपादान-त्वाद्यविवक्षायां कर्मत्वेन विवक्षायामिदं सूत्रं प्रवर्त्तते । प्राचा' तु दुहादीनां व्यापारद्वयार्थकत्वेन "कर्त्तुरीप्सिततमं कर्मे"ति सूत्रेणैव कर्मत्वसिद्धौ कर्मणः शेषत्वविवक्षायां न माषाणामश्नीयादितिवत् प्राप्तषष्ठी वारणाय सूत्र-मिदम् । एवञ्च षष्ठ्यपवादत्वेन सम्बन्धमात्रं द्वितीयार्थं इति प्रतिपादितम्—तन्न, विभागानुकूलव्यापारमात्रस्य धात्वर्थेऽपादानत्वाविवक्षायां कर्मत्वार्थं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सूत्रस्यावश्यकत्वात् । किञ्च कर्त्तुरित्याद्यभावे सर्वत्र षष्ठी प्राप्ता षष्ठ्यपवादत्वेन सम्बन्धार्थकत्वं नोचितम्—तस्मात् गोकर्मकं पयःकर्मकं दोहनमित्येव बोधः । अत एव "कर्मणि द्वितीये" ति विहितद्वितीयायाः सर्वत्र कर्मत्वार्थकत्वम्, अन्यथा क्वचित् कर्मत्वार्थकत्वं क्वचित् सम्बन्धार्थकत्वमिति वैरूप्यापत्तिः । अत एव "अकथितञ्चे"त्यनेनैव कर्मत्वसिद्धे कर्त्तुरीप्सित, तथा युक्त, इति सूत्रद्वयवैयर्थ्यमाशङ्क्य ईप्सितमात्रस्याप्यनेन संज्ञायां वारणर्थानामित्यस्यानवकाशकत्वेन माणवकादपि पञ्चमी स्यादित्युक्तं भाष्ये इति भावः ।

गांदोग्धि पयः

दुहादीनां व्यापारद्वयार्थकत्वे कर्त्तुरित्यनेनैव कर्मत्वम् । तत्र 'गौः पयो दुह्यते' इति प्रधानगोरूपकर्मण्येव प्रत्ययः । प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामिति सिद्धान्तात् । प्रधानकर्मत्वञ्च—कर्त्तृप्रत्ययसमभिव्याहारे कर्त्तृनिष्ठप्रधानव्यापारविशेषणफलाश्रयत्वम् । ण्यन्तविषये एतादृशप्राधान्यस्यैव ग्रहणात् । 'गर्गाः शतं दण्ड्यन्तामि'त्यत्र शते उद्देश्यत्वरूपार्थप्राधान्यसत्त्वेऽपि गर्गाणामेव प्रधानकर्मत्वम् । एवं शकारमसि चोदित इति कर्मणि क्तः । कर्मप्रत्ययसमभिव्याहारे च ज्ञानरूपफलस्य प्राधान्यम् । एवञ्च मद्वृत्तिव्यापारजन्यशकारविषयकजिज्ञासाविषयकं ज्ञानं तदाश्रयस्त्वमिति बोधे युष्मद्रूपकर्मणि प्रत्ययः । एकव्यापारार्थकदुहादिधातोः कर्मणि प्रत्ययेऽप्रधानकर्मण्येव प्रत्ययः । अप्रधानत्वञ्चोक्तप्रधानकर्मभिन्नकर्मत्वम् अप्रधाने दुहादीनामित्युक्तेः । अप्रधानकर्मत्वञ्च गवादीनामेव—फलानाश्रयत्वादिति भावः ।

अकर्मकेति

'मासमास्ते' इत्यत्रास्धातोः आसनकरणकव्याप्त्यनुकूलव्यापारोऽर्थः । एवञ्च व्याप्तिरूपफलाश्रयत्वेन मासस्य कर्त्तुरित्यनेन कर्मत्वम् । 'मासमास्ते' इत्यस्य मासम् आसनेन व्याप्नोतीत्यर्थः ।

यत्तु इदमेव वार्त्तिकं कर्मसंज्ञाविधायकमिति—तन्न, भाष्यानुक्तेः । न च "अकथितञ्चे"ति सूत्रेऽकर्मकप्रकृतिकण्यन्तानां कथं द्विकर्मकत्वमित्याशंक्य, कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्य कर्मणां देशश्चेति भाष्ये उक्तम् । इदमेव भाष्यं पूर्वोक्तवार्त्तिकसत्त्वे गमकमिति वाच्यम् । हिशब्दघटितत्वेन विधा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यकत्वाभावात् । किञ्च 'मासमोदनं पचती'त्यादौ द्वितीयाविधानेऽपि कर्मत्वाभावात् कर्मणि लकारो न स्यादतः कालाध्वानौ कर्मवदिति वक्तव्यम् । तत्प्रत्याख्याने प्राकृतमेवैतत्कर्म यथा 'कटं करोती'त्युक्तम् । अस्य वार्त्तिकस्य कर्मसंज्ञाविधायकत्वे उक्तं वा, प्राकृतं वेति वदेत् । अत एव "समां समां विजायते" इति सूत्रे 'समायां समायां विजायते' इति विग्रहकथनपरं भाष्यं संगच्छते । अस्य विधायकत्वे द्वितीयाया एव तत्र साधुत्वेन भाष्यासङ्गतिः स्यात् तदुक्तं हरिणा—

"कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः ।
सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते ॥" इति ।

सकर्मकविषयेऽपि व्यापनादिवृत्त्यङ्गीकारेण कालादिकर्मणा द्विकर्मकत्वम्, तुल्यन्यायात् । अत एव 'मासमोदनं पचती' ति प्रयोग उपपद्यते ।

कालद्रव्यकर्मणोर्मध्ये द्रव्यकर्म प्रधानम् । कालस्याधारत्वेन द्रव्यद्वारा क्रियासम्बन्धात् । किञ्च कठिनपाक्यस्य महापरिमाणस्य बहुसंख्यस्य च चिरेण पाकोऽन्यस्याचिरेणेति द्रव्यधर्मं पर्यालोच्य क्रियासु कालयोग इति कालादियोगो बहिरङ्गः । किञ्च साधनसम्बन्धोत्तरं क्रियायाः परिच्छेदकबाह्यकालाकांक्षेति स बहिरङ्गः । तथा च प्रधानत्वादन्तरङ्गत्वाच्च 'मासमोदनः पच्यते' इत्यादौ द्रव्यकर्मण्येव प्रत्ययः ।

न चानेन प्रकारेण सर्वेषां सकर्मकत्वात् धातूनामकर्मकत्वव्यवहारानुपपत्तिरिति वाच्यम् ? द्रव्यकर्माभावनिमित्तत्वम् अकर्मकत्वमिति स्वीकारेणादोषात् । तदुक्तं हरिणा—

" अतस्तैः कर्मभिर्युक्तो धातुर्द्रव्यैरकर्मकः ।
तस्य कर्मणि भावे च निमित्तत्वाय कल्पते ॥" इति भावः ।

वस्तुतस्तु—प्राचीनोक्तमेव युक्तम्, कालभावाध्वेति भाष्योक्तवचने हिशब्दस्य निश्चयार्थकत्वेन, पादपूरणार्थकत्वेन च विधायकत्वात् । प्राकृतमेवैतत् कर्मेत्यस्य कालभावाध्वेति वचनेन कर्मत्वमिति भाष्याशयात् । नापि 'समायां समायां विजायते' इति भाष्यविरोधः कालस्याधिकरणत्वेन विवक्षायां तदुपपत्तेः । अन्तर्भूतक्रियान्तरैरिति करणे तृतीया, फलरूपक्रियान्त-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भविन येऽकर्मका इत्यर्थात् । तुल्यन्यायादिति कथनमपि न युक्तम्—प्रमाणाभावेन तादृशप्रयोगस्य भाष्येऽदर्शनादिति दिक् ।

गतिबुद्धीति

'ग्रामं गमयति देवदत्तं यज्ञदत्तः' इत्यत्र ण्यन्तगमिधातोः संयोगानुकूलव्यापारानुकूव्यापारोऽर्थः । तत्र द्वितीयव्यापारप्रयोज्यप्रथमव्यापाररूपफलाश्रयत्वेन प्रयोज्यस्य देवदत्तादेः कर्मसंज्ञा प्राप्ता, णिच्प्रकृतिभूत-गम्धात्वर्थव्यापाराश्रयत्वेन च परत्वात् कर्तृसंज्ञा प्राप्ता, प्रयोज्यप्रयोजकव्यापारोभयापेक्षकर्मसंज्ञापेक्षया प्रयोज्यव्यापारमात्रापेक्षत्वेनान्तरङ्गत्वात् कर्तृसंज्ञा प्राप्ता, कर्तृप्रयोजकव्यापारे णिचो विधानेन तदर्थव्यापारापेक्षकर्मसंज्ञाम्प्रति कर्तृसंज्ञाया उपजीव्यत्वाच्च कर्तृसंज्ञा प्राप्ता तत्र कर्मसंज्ञाविधानार्थं गत्यादिसूत्रं विध्यर्थम् तदुक्तम्—

"परत्वादन्तरङ्गत्वादुपजीव्यतयापि च ।
प्रयोज्यस्यास्तु कर्तृत्वं गत्यादेर्विधितोचिता ॥"

अत एव गत्यादीनां ण्यन्तानां कर्मकर्तृसंज्ञमपि प्राप्नोति । आरम्भसामर्थ्यात् कर्मसंज्ञेति भाष्यं संगच्छते । इति प्राचां मतम् ।

नवीनमते—अन्यानधीनत्वलक्षणार्थप्राधान्यस्य शाब्दप्राधान्यस्य च प्रयोजकव्यापारे सत्त्वेन तदनुरोधिकर्मत्वस्य अन्तरङ्गादपि कर्तृत्वात् बलवत्त्वेन कर्तुरित्येव कर्मत्वसिद्धौ गत्यादिसूत्रं नियमार्थम्—अणौ कर्तुर्णौ यदि कर्मसंज्ञा स्यातर्हि गत्यर्थादीनामेव । तेन पाचयत्यादियोगे न कर्मसंज्ञा । प्रधानकार्यं सर्वतो बलवदिति भाष्ये उक्तम् । आकडारसूत्रे आरम्भसामर्थ्यादित्यस्य गत्यादिनियमारम्भसामर्थ्यादित्यर्थकल्पने न भाष्यविरोधः । "तत्प्रयोजको हेतुश्चे"ति सूत्रे कर्तृपदस्य स्वतन्त्रोपलक्षणत्वान्नोपजीव्यविरोध इति भावः ।

येषामिति

ननु पच्धातोरविवक्षितकर्मत्वेनाकर्मकत्वात् 'पाचयति देवदत्तेन यज्ञदत्तः' इत्यत्र प्रयोज्यस्य "गतिबुद्धी"ति सूत्रेण कर्मत्वापत्तिरिति चेन्न, येषां देशकालादिभिन्नं कर्म न संभवति तेऽत्र शास्त्रेऽकर्मकपदेन गृह्यन्ते इति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सिद्धान्तात् । मानञ्चात्र सूत्रेऽकर्मकग्रहणमेव तथाहि—व्यापारद्वयार्थकत्वेन 'आसयत् सलिले पृथ्वीमि' त्यादौ कर्त्तुरित्येव कर्मत्वसिद्धौ सूत्रेऽकर्मकग्रहणमुक्तार्थे ज्ञापकम् । न चाऽणौ कर्त्तुरिति नियमात् कथं कर्त्तुरित्यनेन 'आसयत् सलिले पृथ्वीमि'त्यादौ कर्मसंज्ञेति वाच्यम् ? शब्दकर्मकाणामणि कर्त्ता सणौ—इत्येको योगो नियमार्थः । सकर्मकाणाञ्चेच्छब्दकर्मकाणामिति । शब्दकर्मातिरिक्ते गत्यर्थादिसकर्मकाञ्चेऽप्राप्तकर्मसंज्ञाविधानार्थं गति-बुद्धि-प्रत्यवसानार्थानामिति द्वितीयो योगः । एवञ्चाकर्मकाणां कर्मणोऽविवक्षयाऽकर्मकाणां गत्यादीनाञ्च कर्त्तुरित्येव सिद्धे सूत्रेऽकर्मकग्रहणमुक्तार्थे ज्ञापकम् । अत एव 'मासमास्यते' इत्यादौ भावे लकारसिद्धिरिति । अविवक्षा द्वेधा—कर्मान्वययोग्यधात्वर्थफलत्यागात्, सत्येव विक्लितिरूपेऽर्थे सम्बन्धित्वेनान्वयविवक्षणाद्वेति कैयटमतम् ।

नागेशमतेऽत्र शास्त्रे प्रकृतसूत्रे चाकर्मकपदेनाविवक्षितकर्मणोऽपि ग्रहणम्, अत एव 'कृतपूर्वी कटमि' त्यादौ भावे क्त उपपद्यते । लुनातेर्निवृत्तप्रेषणाण्णिचि 'लावयति केदारं देवदत्त' इत्यादौ केदारस्य कर्मद्वितीयान्तस्य कैयटप्रयोगः संगच्छते । न चार्थान्तरे वृत्त्याऽकर्मकत्वमिति वाच्यम् ? प्रेरणांशत्यागेऽपि फलांशस्य तस्यैव सत्त्वात् । अत एव—अधीगर्थेऽति सूत्रे कर्मणः शेषत्वविवक्षयाऽकर्मकत्वे 'मातुः स्मर्यते' इत्यत्र भावे लकारसिद्धिः । कालकर्मणामुपसंख्यानं कर्त्तव्यम्, न कर्त्तव्यम्, न च केचित् कालभावाध्वभिरकर्मकाः त एवं विज्ञास्यामः—क्वचिद् येऽकर्मका इति ।

अत्र क्वचिदित्यस्य कर्मसंज्ञा प्रयोजकव्याप्त्यादिरहितेऽर्थे इत्यर्थः । अकर्मकपदस्यावस्थान्तरे कर्मरहिता इति फलितोऽर्थः ।

तादृशत्वञ्च द्रव्यकर्माभावात् तदविवक्षणाद्वेत्युभयविधमपि गृह्यते । अत एव—अकर्मकाधिकारे श्रुदृश्यादिभ्य आत्मनेपदविधानं संगच्छते । यद्वा यत्कर्म भवति न च भवति तेनाकर्मकाणाम् । न चैतत् कर्म क्वचिदपि न भवतीति पक्षान्तरभाष्यात् व्यभिचारिद्रव्यकर्मरहितत्वमकर्मकत्वम् । एवञ्चात्यन्ताविद्यमानकर्मकाणामेवात्र शास्त्रेऽकर्मकपदेन ग्रहणम् । इति कैयटोक्तिर्न युक्ता, पूर्वोक्तभाष्यविरोधात् । पाचयति देवदत्तेन यज्ञदत्त इत्यत्रानभिधानात् कर्मत्वन्नेति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वस्तुतस्तु—अकर्मकग्रहणसामर्थ्यात् गत्यादिसूत्रे एव तादृशानामकर्मकपदेन ग्रहणम् न तु शास्त्रे तथा विवक्षितमिति प्राचां मतेऽपि न दोष इति दिक् ।

वृक्षं वृक्षमिति

वृक्षादीनां सेचने कर्मत्वेनान्वयात् "कर्मणि द्वितीये" त्यनेनैव द्वितीयासिद्धौ कर्मप्रवचनीयसंज्ञाविधानफलं षत्वाभावमात्रमिति प्राचीनाः ।

नागेशमते कर्मत्वेनाविवक्षायामप्राप्तद्वितीयाविधानार्थं संज्ञाया आवश्यकत्वात् संज्ञाविधानफलं द्वितीयोत्पत्तिः, षत्वाभावश्च । किञ्च "कर्मणि द्वितीये" त्यनेन द्वितीयास्वीकारे वृक्षस्य सेचनक्रियायामन्वयात् । प्रतिना सामर्थ्याभावेन प्रतिवृक्षमित्यत्र समासानुपपत्तिः ।

किञ्च कर्मप्रवचनीयेत्यन्वर्थसंज्ञावलात् क्रियानुयोगिकसम्बन्धद्योतकस्यैव संज्ञाविधानेन व्यापकत्वविशिष्टक्रियाविशेषद्योतकत्वात् कर्मप्रवचनीयसंज्ञानुपपत्तिः । अत एव भाष्ये किमर्थं पुनरिदमुच्यते । न चोपसर्गसंज्ञाबाधनार्थमिति वाच्यम् ? क्रियायोगाभावादित्युक्त्वा द्वितीयार्थमिति सिद्धान्तितम् । अत एव प्रत्यर्थं शब्दनिवेश इत्यत्रार्थमर्थं प्रतीति विग्रहो भाष्ये प्रदर्शितः । अर्थस्य निवेशनक्रियानिरूपिताधिकरणत्वेऽपि कर्मप्रवचनीयसंज्ञावलात् सप्तमीं बाधित्वा द्वितीया सिध्यति ।

वस्तुतस्तु—प्राचीनोक्तमेव युक्तम्—"नित्यवीप्सयो"रित्यनेन वीप्साविवक्षायामेव पदस्य द्वित्वं भवति । यद्विभक्त्यन्तस्य द्वित्वं चिकीर्षितं तद्विभक्त्यर्थसम्बन्धावच्छिन्नव्यापकता वीप्सा द्विर्वचनेन बोध्यते । कर्मत्वाविवक्षायाम् द्वित्वानुपपत्तेः । प्रतिवृक्षमित्यत्र समासानुपपत्तिरपि न, प्रतिद्योत्यव्यापकतायां वृक्षस्यान्वयेन प्रतिना सामर्थ्यसत्त्वात् । संज्ञाप्रवृत्तिरपि सुलभा—वृक्षप्रतियोगिकसेकानुयोगिकव्यापकत्वरूपसम्बन्धद्योतकत्वेन संज्ञाप्रवृत्तौ बाधकाभावात् । किमर्थं पुनरिदमिति भाष्यासंगतिरपि न, 'वृक्षं प्रति विद्योतते विद्युत्' इत्युदाहरणपरकत्वात् । विपूर्वक'द्युत्'धातोरकर्मकत्वेन संज्ञां विना द्वितीया दुर्लभा ।

'अर्थमर्थम्प्रतीति' विग्रहप्रदर्शनमपि युक्तमेव, "अभितः परित" इत्यनेन तत्र द्वितीयाविधानादिति दिक् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वतन्त्रः कर्त्ता

कारकाधिकारात् क्रियाजनने स्वतन्त्रः कर्त्तृसंज्ञः स्यादिति । स्वातन्त्र्यञ्च—कर्त्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थाश्रयत्वम् । 'पक्वस्तण्डुलो देवदत्तेने'त्यत्र देवदत्तस्य कर्त्तृत्वसिद्धये कर्त्तृप्रत्ययसमभिव्याहारे इति विशेषणम् । न च 'देवदत्तः यज्ञदत्तेन पाचयती' त्यादौ प्रयोज्यस्य कर्त्तृत्वन्न स्यात् प्रयोज्यस्य प्रधानीभूतधात्वर्थाश्रयत्वाभावादिति वाच्यम् ?, णिचो वाचकत्वेन ण्यन्तधातु–तत्प्रकृतिधातु–एतदुभयवाच्यव्यापारयोः स्व-स्वार्थं प्रतिप्राधान्यसत्त्वेनादोषात् ।

"कारके" इति सूत्रभाष्यात् स्वक्रियाकारकप्रवर्त्तकत्वं स्वतन्त्रत्वमिति । वस्तुतस्तु—स्वतन्त्रत्वज्ञानाधीनं कर्त्तृत्वज्ञानं कर्त्तृत्वज्ञानाधीनं स्वतन्त्रत्वज्ञानमित्यन्योन्याश्रयापत्तिरतः तद्धातुविशिष्टव्यापाराश्रयत्वं स्वतन्त्रत्वम् । वै०—स्वप्रयोज्यबोध-विषयत्वप्रकारक-तात्पर्यविशेष्यत्व,— स्वप्रयोज्यविशेष्यतानिरूपित–प्रकारतानाश्रयत्व,–इत्युभयसम्बन्धेनेति दिक् ।

तमब्ग्रहणमिति

कारकाधिकारात् करणल्युडन्तकरणेति महासंज्ञया च साधकत्वे लब्धे साधकग्रहणमेव साधकतमार्थं भविष्यतीति "साधकतमं करणमिति" सूत्रे तमब्ग्रहणं व्यर्थमिति चेन्न, "आधारोऽधिकरणमि"ति सूत्रेऽप्यधिकरणमहासंज्ञयैवाधारे लब्धे सूत्रे प्रकृष्टाधारपरमाधारग्रहणं स्यात्तथा च 'तिलेषु तैलमि'त्यादावेव संज्ञा स्यान्न तु 'गङ्गायां घोषः' इत्यादौ । कारकप्रकरणे प्रकर्षार्थप्रत्ययं विना शब्दसामर्थ्यगम्यः प्रकर्षो नाश्रीयते इति ज्ञापनार्थं तस्यावश्यकत्वात् । एवञ्च गौणमप्याधारत्वादि–सप्तम्यादिशक्यमेवेति भावः । तीरधर्माधारत्वस्यात्यन्तसामीप्यात् प्रवाहे आरोपः । यदि व्यवहितो गङ्गातो घोष इति तदा गङ्गापदस्य तत्तीरे लक्षणा ।

यदि महासंज्ञया–आधाराक्षेपकरणासमर्थं प्रति आधारादिपदं चरितार्थम्, साधकशब्दस्य यद्व्यापारानन्तरमव्यवधानेन फलोत्पादस्तत्र शक्तिः । आधारपदस्य सर्वावयवव्याप्त्या य आधारस्तत्र शक्तिस्तदा 'गङ्गायां घोष' इत्यादि सिद्धयर्थं कारकप्रकरणे उद्देश्यवाचके पदे स्वरितत्वप्रतिज्ञया गौणाधारादेर्ग्रहणं स्यात्, स्वरितेनाधिकं कार्यमित्यर्थात् । सूत्रे तमब्ग्रहणेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वरितत्वप्रतिज्ञा न कार्येति भावः। एवञ्च व्यवधानेन फलोत्पादके करणत्वोपचारेण तृतीयान्तप्रयोगस्यासाधुत्वबोधनार्थं तमब्ग्रहणमिति दिक्।

दिवः कर्म च

सूत्रे चकारग्रहणं संज्ञाद्वयसमावेशार्थम्। तेन दिवः साधकतमस्य शक्तिद्वययोगात् 'अक्षैर्देवयते' इत्यत्र परत्वात् करणसंज्ञाप्रयुक्ततृतीया, अणावकर्मकादिति कर्मत्वप्रयुक्तपरस्मैपदाभावः। अत्र विप्रतिषेधशास्त्रबलात्तृतीयैव कर्मत्वकरणत्वोभयबोधिका। न चाक्षान् दीव्यतीति कथं प्रयोग इति वाच्यम्, फलाश्रयत्वसमानाधिकरणकर्मत्वविवक्षया तदुपपत्तेः। 'अक्षाणां देविते' त्यादौ तृतीयां बाधित्वा परत्वात् कृद्योगलक्षणा षष्ठी।

न चैवं मनसा देव इत्यत्रापि षष्ठ्यापत्तिरिति वाच्यम्,हेतुतृतीयान्तेन पचाद्यजन्तदेवशब्दस्य समासे "मनसः संज्ञायामि" त्यलुकि कर्तृकर्मणोरभावेन षष्ठ्यप्राप्तेः। न च शक्तिद्वयस्वीकारे कर्मणि लकारे करणत्वशक्तेरनुक्तत्वेन तृतीयापत्तिरिति वाच्यम्, द्रव्यगतानेकशक्तिमध्ये एकस्या अभिहितत्वे परस्या अपि-अभिहितवत् प्रकाशेनादोषात्। अत एवापादानमुत्तराणि कारकाणि बाधन्ते-इत्यस्योदाहरणम् 'गौः पयः दुह्यते' इति कर्मणि लकारे पञ्चमी नेति भाष्ये उक्तम्। एकैव शक्तिः संज्ञाद्वयोपयोगिनीति कथनं न समीचीनम्, कर्मादिपदानां कर्मत्वादितत्तच्छक्तिरूपेण बोधकतया तयोर्भेदस्यौचित्यादिति भावः।

जटाभिरिति

जटाभिस्तापसो ज्ञात इत्यर्थे ज्ञानक्रियायां जटायाः करणत्वात् तृतीयासिद्धौ सूत्रमिदं व्यर्थमिति चेन्न, करणत्वाविवक्षायां लक्ष्यलक्षणभावमात्रविवक्षायां तृतीयार्थं सूत्रस्यावश्यकत्वात्। 'कमण्डलुपाणि छात्रमद्राक्षीत्'इत्यत्र कमण्डलुपदात्तृतीयावारणाय-इत्यंभूतस्य यत्र लक्षणवाचकात् पृथगुपस्थितिरेव तत्रैवानेन तृतीयेति नियमः स्वीकर्तव्यः। न च नियमानङ्गीकारेऽप्युत्पन्नायाः तृतीयायाः सुपो धातु-इति लुकि न दोष इति वाच्यम्, समासोत्तरं तृतीयाया उत्पत्त्या समासरूपप्रातिपदिकानवयवत्वेन लुकोऽप्राप्तेः। इति प्राचां मतम्।

नागेशमते कमण्डलुयुक्तपाणिरूपस्य कमण्डलुपाणित्वस्य लक्षणत्वेन तद्वाचककमण्डलुपाणिशब्दात्तृतीयावारणाय पूर्वोक्तनियमः स्वीकर्तव्यः अत एव सकृदसौ कमण्डलुपाणिश्छात्रो दृष्टस्तस्य तदेव लक्षणं भवतीति भाष्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संगच्छते। कमण्डलोर्लक्षणत्वे हि तस्य पुंस्त्वेन स एवेति वदेत्। किञ्च कमण्डलुशब्दात्तृतीयायामपि तद्विशिष्टस्य तन्मध्यपतितन्यायेन प्रातिपदिकत्वात् लुको दुर्वारत्वम्। अत एव नरम्मन्य इत्यादाविजन्तस्योत्तरपदपरत्वाय पूर्वं सुपो लुकि उत्पन्नस्यामः सुपो धातु-लुकमाशङ्क्य विधानसामर्थ्यान्न लुगिति समाधानं भाष्योक्तं संगच्छते।

वस्तुतस्तु-जनराशब्दस्य जरसादेशापत्तिवारणाय समुदायनिष्ठोद्देश्यतानिरूपितविधेयताश्रयस्यैव तन्मध्यपतितन्यायेन ग्रहणात् प्रकृते तन्मध्यपतितन्यायाप्रवृत्त्या प्राचीनोक्तं युक्तमेव। "अनुर्लक्षणे" इति सूत्रस्थभाष्यासंगतिरपि न, उद्देश्यप्रतिनिर्देश्ययोरैक्यमापादयत् सर्वनामपर्यायेण तत्त्रिलिङ्गभाग्भवतीति सिद्धान्तेन लक्षणशब्दस्य नपुंसकत्वेन तदेव लक्षणमिति भाष्यस्योपपन्नत्वात्। नरम्मन्य इत्यत्र खिदन्ते उत्तरपदे पूर्वपदस्येजन्तस्येत्यर्थात् तन्मध्यपतितन्यायप्राप्तिः सुलभेति दिक्

कर्मणा यमभिप्रैतीति

सम्प्रदीयतेऽस्मै इत्यर्थकसम्प्रदानमिति महासंज्ञया दाधात्वर्थस्य कर्मणेत्यर्थः। न च 'बालाय कथां कथयती'त्यादौ संज्ञा न स्यात्, दाधात्वर्थत्वाभावादिति वाच्यम्, दाधात्वर्थस्येति धात्वर्थमात्रोपलक्षणत्वात्। कर्मणा सम्बन्धुमभिप्रैति-इच्छति। कर्मणा सम्बन्धश्च स्वत्वादिरूपः।

'विप्राय गां ददाती' ति वाक्यात् विप्रसम्प्रदानकं गोकर्मकं दानमिति बोधः। सम्प्रदानत्वशक्तिमान् सम्प्रदानचतुर्थ्यर्थः। कर्मणेत्यस्याभावे कर्मणोऽप्युद्देश्यतयाऽन्तरङ्गत्वात् तस्यैव संज्ञा स्यात्। एवञ्च कर्मसंज्ञया सह सम्प्रदानसंज्ञापर्यायेण स्यात्। यं स ग्रहणाभावे क्रियाकर्मणा योऽभिप्रैति इत्यर्थे विप्रादेरेव स्यात्। न च कर्तृसंज्ञा निरवकाशा स्यादिति वाच्यम्, अकर्मकविषये कर्तृसंज्ञायाः सावकाशत्वात्।

न च कर्तुः कर्तृत्वाभावे कथं गोः कर्मत्वम्, कर्तुरीप्सिततमस्यैव कर्मसंज्ञाविधानादिति वाच्यम्, कर्मसंज्ञायां कर्तृग्रहणस्य स्वतन्त्रोपलक्षणत्वात्। अत एव 'सार्थाद्वीयते' इत्यत्र कर्तुरपादानत्वेऽपि कर्मणि लकारसिद्धिरिति भावः।

हरये रोचते भक्तिः

विषयतासम्बन्धावच्छिन्नप्रीत्यनुकूलः प्रीतिसमानाधिकरणो यो व्यापारः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स रुचेरर्थः। विषयतासम्बन्धावच्छिन्न-प्रीत्यनुकूलः प्रीतिव्यधिकरणव्यापारोऽभिलषेरर्थः। प्रीतिविशिष्टो व्यापारो भजेरर्थः, वै०-स्वीयविषयत्वासामानाधिकरण्य-स्वीयसमवायित्वासामानाधिकरण्य - स्वानुकूलत्वैतत्त्रितयसम्बन्धेनेति त्रयाणां धातूनामर्थभेदः। न च प्रीधातोरपि रुच्यर्थत्वात् प्रीयमाण इति कर्मणि शानजानुपपत्तिरिति वाच्यम् ? प्रीयमाण इति निर्देशेनैव प्रीधातूपात्त-प्रीत्याश्रयस्य न सम्प्रदानत्वमिति कल्पनात्। अत एव 'हरिं प्रीणयति भक्ति'-रिति प्रयोगः संगच्छते।

सूत्रे प्रीयमाणपदाभावे 'देवदत्ताय रोचते मोदकः पथि' इत्यादौ पथिन्-शब्दस्यापि सम्प्रदानत्वापत्तिः। न च क्रियाजनकत्वमात्रविवक्षायां संज्ञान्तरा-प्राप्तिविषये सूत्रस्य चारितार्थ्येनात्र परत्वादधिकरणसंज्ञया बाधान्न दोष इति वाच्यम्, 'देवदत्तं रोचते' इत्यस्याप्यापत्तेः। प्रीयमाणग्रहणसत्त्वे तु कर्मसंज्ञा-पवादत्वान्न दोष इति दिक्।

गोपी स्मरादिति

मुख्ये-सखीजनः कृष्णं बुध्यते, गोपी प्रेरयतीति विवक्षायां कृष्णाय श्लाघते इति। श्लाघया स्वसखीजनं कृष्णं बोधयतीति बोधः। गौणे—कृष्णः स्वानु-रागं बुध्यते गोपी प्रेरयतीति विवक्षायां गोपी कृष्णं स्वानुरागं बोधयति। श्लाघया गोपी कृष्णं स्वानुरागं बोधयति। ज्ञाप्यमानपदे ण्यर्थकर्मणः प्रकृ-त्यर्थकर्मणश्च ग्रहणादिति भावः।

ध्रुवमपाये इति

विभागजनकव्यापारानाश्रयत्वे सति विभागाश्रयत्वम् ध्रुवत्वम्। 'मथुराः पाटलिपुत्रकेभ्य आढ्यतरा' इत्यादौ बुद्धिपरिकल्पितविभागमाश्रित्य पञ्चमी-साधनपरभाष्यप्रामाण्यात् विभागोऽत्र बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धि-परिकल्पितोऽपि गृह्यते, न वास्तवसम्बन्धपूर्वको वास्तव एव।

ध्रुवग्रहणाभावे अपायविषये यत्कारकं तदपादानमित्यर्थात् पचत्यादियोगे चरितार्थायाः कर्तृसंज्ञाया अपादानसंज्ञाऽपवादः स्यात्। हरिणाऽप्युक्तम्—

"अपाये यदुदासीनञ्चलं वा यदि वाऽचलम्।
ध्रुवमेवातदावेशात्तदपादानमुच्यते॥"

नागेशमते—'त्रस्तादश्वात् पतितः', 'धावतः पतितः' इत्यादौ ध्रुवत्वा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावादपादानत्वं न स्यादित्याशङ्क्य—अध्रौव्यस्याविवक्षितत्वमत्र, यतः सतोऽप्यविवक्षा भवतीति समाधानपरभाष्यासंगतिः प्राचां मते। पत्धात्वर्थव्यापारानाश्रयत्वस्य ध्रुवत्वस्याश्वे सत्त्वात्। न च पूर्वपक्षाभिप्रायकमिदं भाष्यमिति वाच्यम्, सिद्धान्तेऽपि त्वदुक्तध्रुवपदार्थकथनस्यौचित्येन तदसंगतेः। लोकसिद्धातिरिक्तार्थे ध्रुवपदस्य शक्तिकल्पने गौरवञ्च। अतदावेशादित्यस्य—अध्रुवत्वाविवक्षणादित्यर्थः। एवञ्चापाये गतिविशेषे सति यद्ध्रुवम्—अवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वोपयोगि व्यापारस्यानाश्रयं तदपादानमिति सूत्रार्थः। त्रस्तादित्यादाववधित्वोपयोगित्वाश्रयणेन शङ्का तदविक्षणादित्युत्तरम्। 'वृक्षस्य पर्णं पतती'त्यादौ वृक्षस्यैव पर्णद्वारा पातजनकत्वात् प्राप्तापादानत्ववारणाय—अपाये इति। एवञ्चापाये इति—कारके इत्यस्य क्रियाजनकत्वेन विवक्षिते इत्यर्थे तात्पर्यग्राहकं बोद्धव्यम्। अपादानत्वशक्तिश्च—प्रकृतधात्वर्थविभागाश्रयत्वसमानाधिकरणेति—अपादानसमभिव्याहारे विभागोऽपि धात्वर्थः। परस्परस्मान् मेषावपसरत इत्यत्र मेषपदोपात्ते विभागाश्रयत्वस्याविवक्षणान्नापादानत्वमिति भावः।

अन्येति

"अन्यारादि" ति सूत्रेऽन्य इत्यर्थग्रहणम्, तदर्थश्च भेदवान्। अत एव घटाद्भिन्न इत्यत्र पञ्चमी सिध्यति। घटो न पट इत्यत्र न पञ्चमी, नञर्थस्य भेदत्वात्। परे तु ध्रुवमिति सूत्रेऽपायशब्देन भेदस्यापि ग्रहणम्, "पञ्चमी विभक्ते" इति सूत्रे विभागार्थकविभक्तपदेन भेदस्य ग्रहणं व्याख्यानात्। 'भिदिर् विदारणे' इत्यत्र भेदज्ञानविषयत्वमपि विदारणम्, एकत्वेन गृहीतस्य तथा बोधे बुद्धिविदारणस्य सत्त्वात्। अत एव 'घटात् भेदः' इति सिध्यति, तद्योगेऽप्यपादानत्वात्। तस्यैव सम्बन्धत्वेन विवक्षायां घटीयो भेद इति प्रयोगो भवति। अन्यशब्दस्य क्रियात्वाभावात् पञ्चमीविधानार्थं सूत्रेऽन्यग्रहणम्। अत एवेतरग्रहणं चरितार्थम्। अत एव भाष्येऽन्य इत्यर्थग्रहणं क्वापि नोक्तमिति भावः।

वस्तुतस्तु—अन्येति भावप्रधाननिर्देशेन—अन्यत्वार्थकयोगे पञ्चमीत्यर्थः। घटादेक इति प्रयोगोऽपि साधुरेव। अन्यार्थकस्य लिङ्गसंख्यान्वय्यर्थकस्यैव ग्रहणात् घटः पटो नेत्यादौ न पञ्चमी। घटस्यायमिति विवक्षायां घटीयो भेद

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इति । एवञ्च भेदविशिष्टार्थकयोगेऽपि पञ्चमीत्यर्थबोधनार्थं सत् प्रपञ्चार्थमिति भावः ।

प्रभृतियोगे

प्रभृत्यर्थयोगे पञ्चमीत्यर्थः । अत एव यतश्चाब्दकालनिर्माणं ततः पञ्चमी, 'कार्त्तिक्या आग्रहायणी मासे' इति तत्प्रत्याख्यानाय इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते कार्त्तिक्याः प्रभृत्याग्रहायणी मासे इति भाष्येण प्रभृतिशब्दाभावेऽपि तदर्थसत्तामात्रेण पञ्चमीबोधनात् प्रभृतियोगे इत्यस्य प्रभृत्यर्थयोगे इत्यर्थः । अन्यथा प्रभृतिपदाभावे पञ्चम्यर्थं वार्त्तिकस्यावश्यकत्वात् प्रत्याख्यानासंगतिः स्यात् । एवं तदर्थकारभ्यशब्दयोगेऽपि पञ्चमी–यथा—अवीचिमारभ्य मेरुपृष्ठपर्यन्तं भूलोको मेरुपृष्ठादारभ्य ध्रुवपर्यन्तम् ग्रह–नक्षत्र–तारागणचित्रितोऽन्तरिक्षलोक इति भाष्यप्रयोगे । आरभ्येत्यस्य गृहीत्वेत्यर्थे तु द्वितीया–यथा अवीचिमारभ्येति ।

वस्तुतस्तु—समभिव्याहृतपदार्थनिरूपितं गम्यमानक्रियापेक्षं तस्यावधित्वमिति—अपादानत्वादेव पञ्चमी । कार्त्तिकीतो विभक्ते—अत एव कार्त्तिक्यवधिके आग्रहायणीघटितमासे कार्त्तिकीमादाय गते, आग्रहायणीति बोधः । भवात् प्रभृति आरभ्य वेत्यत्र भवावधिके मरणान्ते काले भवकालमारभ्य हरिः सेव्य इति भावः ।

समुच्चयार्थमिति

"पृथक्विने"ति सूत्रेऽन्यतरस्यां ग्रहणं द्वितीयासमुच्चयार्थम्, अन्यतरस्येत्येकं पदम, ग्रामित्यङ्गीकारार्थं द्वितीयं पदमिति केचित्तन्न-पृथगादियोगे द्वितीयानुपपत्तेः । परे तु विना वातं विना वर्षमित्यादौ त्रृते शब्दयोग इव ततोऽन्यत्रापि दृश्यते इति वार्त्तिकेन द्वितीयासिद्धौ अन्यतरस्यांग्रहणस्य न द्वितीयासमुच्चयः फलम् । अत एव भाष्ये द्वितीयासमुच्चयो नोक्तः । पञ्चम्या अधिकारे द्वितीयाषष्ठीविषये पञ्चम्याः प्रतिषेधो वक्तव्यः, दक्षिणेन ग्रामं, दक्षिणतो ग्रामस्येति भाष्यात् "एनपा द्वितीया" इति सूत्रं षष्ठ्यतसर्थ इत्यतः प्रागिति दर्शितम् । अन्यथा "एनपा द्वितीया" इति सौत्रक्रमत्यागेऽल्पाच्तरत्वेन षष्ठीद्वितीयेति न्याय्यमिति तद्विपरीतकरणे च बीजानापत्तिरिति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

षष्ठी शेषे

उक्तादन्यः शेष इति सिद्धान्तात् कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः सम्बन्धः शेषः। कारकविभक्तीनां क्रियाजनकत्वसमानाधिकरणकर्तृत्वादिशक्तिरूपेण बोधकत्वम्। शेषषष्ठ्यास्तु स्व-स्वामिभावादित्वेन, सम्बन्धत्वेन रूपेण च भानम्। स्वामित्वं सम्बन्ध इति प्राचीननैयायिकोक्तं न युक्तम्, पुरुषे स्वामित्वाभावसत्त्वात् तत्सम्बन्धेन राजपुरुषेऽपि राजाभावापत्तेः।

एवं स्वत्वं सम्बन्ध इत्यपि न युक्तम्, सम्बन्धस्य द्विष्ठत्वात् स्वत्वस्य द्विष्ठत्वाभावेन सम्बन्धत्वानुपपत्तेः। तस्मात् स्वत्वस्वामित्वसमूहः सम्बन्धः। षष्ठ्यर्थस्य संसर्गमर्यादयैव भानम् न तु प्रकारतया। कर्मादीनामपि सम्बन्धत्वेन भाने षष्ठ्येव। अथवा क्रियाकारकभावमूलकसम्बन्धस्यैव विवक्षायां षष्ठी। छात्रस्य हसितमिति भाष्यप्रयोगेण कर्तुरपि सम्बन्धत्वेन विवक्षा भवति। संयोगसम्बन्धावच्छिन्नाधारस्य न सम्बन्धत्वेन विवक्षा। मतुबविधायकसूत्रेऽस्मिन् ग्रहणात्। अन्यथाऽऽधारतायाः शेषत्वेन विवक्षया घटोऽस्यास्तीत्यर्थे घटवान् इति सिद्धौ तद्वैयर्थ्यं स्यात्। न चाधारस्थले षष्ठ्यन्तत्वाभावात् षष्ठ्यर्थे कथं बहुव्रीहिरिति वाच्यम्? लोहितोष्णीषेत्यत्र लोहिता उष्णीषा येष्विति सप्तम्यर्थे बहुव्रीहिस्वीकारादिति भावः।

दिवस्तदर्थस्य

"दिवस्तदर्थस्ये" ति सूत्रे शेषपदसम्बन्धे दिव इत्यनेन षष्ठ्यां समासाभावस्य सिद्धौ विभाषोपसर्गे इत्यस्य वैयर्थ्यापत्तिः। न चानेन वैकल्पिकषष्ठीविधानात् पक्षे "षष्ठी शेषे" इत्यनेन षष्ठी तदा समासप्रवृत्तिफलमिति वाच्यम्? नोपसर्गे इति न्यासेन दिव इत्यस्य निषेधे शेषषष्ठ्यां समासविकल्पेन रूपद्वयसिद्धौ विभाषाग्रहणस्य वैयर्थ्यापत्तेः। "विभाषोपसर्गे" इति सूत्रे शेषपदासम्बन्धे कर्मण्येव विकल्पेन षष्ठीविधानात् छन्दस्यापाद्यमानरूपाभावात् ब्राह्मणे विभाषेति षष्ठ्यभावे "कर्मणि द्वितीये" ति सूत्रेण द्वितीयासिद्धौ "द्वितीया ब्राह्मणे" इति सूत्रवैयर्थ्यापत्तिः। तस्मात् सूत्रद्वयारम्भसामर्थ्यात् शेष इत्यस्य न सम्बन्धः। अत एव "द्वितीया ब्राह्मणे" इति सूत्रं गामस्य तदहः सभायां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दिव्येयुरित्यत्र नित्यं षष्ठीप्राप्तौ द्वितीयार्थमिति भाष्योक्तं संगच्छते। अत एव तिङन्तमुदाहरति-शतस्य दिव्यतीति भावः।

द्विरह्न्यध्ययनम्

ननु "दिवस्तदर्थस्ये"ति सूत्रे शेषपदसम्बन्धाभावात् "कृत्वोऽर्थे" इति सूत्रेऽपि शेषपदस्य सम्बन्धो न स्यात्तथा चाधिकरणकारके एव षष्ठीविधानात् 'द्विरह्न्यध्ययनमि'त्यत्र षष्ठी कुतो नेति चेन्न ? वृत्त्यादिप्रामाण्यात् "अधीगर्थ-" इति सूत्रे कर्मादीनामविवक्षा शेष इति बहुवचनोपादानेन चाधिकरणादिपद-घटितसूत्रेऽपि शेषपदस्य सम्बन्धात् पूर्वोक्तप्रयोगे शेषत्वाभावान्न षष्ठीति प्राचां मतम्।

नागेशमते—'शतस्य दिव्यते' इत्यादौ भावे लकारसिद्ध्यर्थं कर्माश्रयषष्ठी-विषये "सूत्रोपात्तसकर्मकाणामकर्मकवद्वचनम्" इति वार्त्तिकप्रत्याख्यानाय शेष इति वर्त्तते इति भाष्यकृतोक्ते परेण शेषश्च क इति पृष्ठे "शेषे षष्ठी" ति सूत्रोक्तं 'कर्मादीनामविवक्षा शेषः' इति सिद्धान्तिना स्मारितम्, एतावता "कृत्वोऽर्थे" इति सूत्रे न शेषपदसम्बन्धो लभ्यते। किञ्चास्मात् भाष्यात् "दिवस्तदर्थस्ये"ति सूत्रे शेषपदसम्बन्ध आवश्यकः, अन्यथा 'शतस्य दिव्यते' इत्यत्र भावे लकारानुपपत्तेः। अत एव वार्त्तिकव्याख्यायाम्—'अधीगर्थादयः प्रेष्यबूपर्यन्ताः कर्माश्रयपदेनोच्यन्ते' इति कैयटोक्तिः संगच्छते। एवञ्च शेष इत्यनुवृत्त्या वार्त्तिकप्रत्याख्यानवत् "द्वितीया ब्राह्मणे" "विभाषोपसर्गे" इति सूत्रद्वयप्रत्याख्याने एव भाष्यतात्पर्यम्। किञ्च यदा कर्मविवक्षितं भवति तदा षष्ठी न भवति—'स्मराम्यहं मातरम्' इत्युक्तं भाष्ये। करणादिपदघटितसूत्रे शेष इत्यस्य सम्बन्धे तु यदा कर्मादिविवक्षितं भवतीति वदेत्। एवञ्च "ज्ञो-ऽविदर्थस्ये" ति सूत्रेऽपि शेषपदासम्बन्धः। एवञ्चाज्ञानार्थकज्ञाधातुयोगे न कदापि तृतीया। 'शतं दीव्यती'ति कर्मत्वविवक्षायां सिद्ध्यति "अधीगर्थ-"इति सूत्रे मण्डुकानुवृत्त्या शेषपदसम्बन्ध इति भावः।

वस्तुतस्तु—वृत्त्यादिप्रामाण्यात् कर्मादीनामविवक्षा शेष इति बहुवचनो-पादानाच्च करणादिपदघटितसूत्रेऽपि शेष इत्यस्य सम्बन्धः। "षष्ठी"ति सूत्रोक्तं स्मारितमिति कथनं न युक्तम्, मानाभावात्, अनुभवविषयाः कर्मादयस्त-द्विरुद्धस्मरणासंभवाच्च। सूत्रद्वयप्रत्याख्याने एव भाष्यतात्पर्यमित्यपि न युक्तम्,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तर्त्तहि वक्तव्यं न वक्तव्यमित्यादिशब्दानुक्तेः । शेषत्वविवक्षया 'शतस्य दिव्यती'-ति प्रयोग उपपद्यते 'शतं दीव्यती' ति प्रयोगः द्यूताद्यर्थातिरिक्तस्थले भवति । कर्मादीति वदेदिति कथनं न युक्तम्, प्रकृतसूत्राभिप्रायेण तथोक्तेः । मण्डूका-नुवृत्तौ गौरवात् प्राचीनोक्तमेव युक्तमिति भावः ।

स्तोकं पाकः

"कर्त्तृकर्मणोरि' ति सूत्रे कर्त्तृसाहचर्यात् कर्मापि धात्वर्थे भेदेनान्वय्येव गृह्यते । अत एव 'स्तोकं पाक' इत्यत्र स्तोकपदान्न षष्ठी, स्तोकस्य विक्लिता-वभेदेनान्वयात् । एवं 'स्तोकं पाचक' इत्यत्र न समानाधिकरणसमासः, नापि सुप्सुपेति । सुबन्तार्थविशेष्येणानन्वयेन सामर्थ्याभावात् । न च कष्टश्रित इत्यत्रापि समासो न स्यात्, विशेष्येणान्वयाभावादिति वाच्यम्, 'द्वितीयाश्रित" इति सूत्रारम्भेणावयवद्वारकसामर्थ्यमादाय तदुपपत्तेः ।

अत एव दारुणं यथा भवति तथा—अध्यापक इत्यर्थकस्य दारुणाध्यापक इत्यस्य सिद्ध्यर्थं मलोपश्च वक्तव्य इत्युक्तं भाष्ये । अन्यथा समासेन सिद्धे मलोपवचनस्य वैयर्थ्यापत्तिः । अस्मादेव भाष्यात् क्रियाविशेषणवाचकपदात् षष्ठ्यपि न भवति । अन्यथा "तृजकाभ्यां कर्त्तरी"ति सूत्रारम्भेणावयवद्वारक-सामर्थ्येऽपि षष्ठीसमासप्रवृत्त्या षष्ठीसमासे कृते सुपो लुकैव दारुणाध्यापकस्य सिद्धो मलोपवचनस्य वैयर्थ्यापत्तेः । न च वाक्ये मलोपार्थं तद्वचनमिति वाच्यम् ? वाक्ये मलोपश्च वक्तव्य इत्यनुक्तेः । अत एव यदा क्रियाविशेषणं दारुणादयस्तत्र वैयधिकरण्यात् समासाभावान्मलोपो विधीयते इति कैयटोक्तिः संगच्छते । "सुप्सुपे"ति समासो न सार्वत्रिक इति भावः ।

कृति किम् ?

कर्त्तृकर्मभ्यां क्रियाया आक्षेपात् क्रियावाचकधातुरेव सम्भवति । कार-कान्वययोग्यतावच्छेदकसाध्यत्वेन धातुभिरेव क्रियोपस्थितेः । अत एव हिरु-गादियोगे न कर्मसंज्ञा । 'अधिका खारी द्रोणेने'त्यत्र हेतौ तृतीया, क्रियायोगा-भावेन कर्त्तृत्वाभावात् । धातोश्च द्वये प्रत्ययाः भवन्ति–तिङः कृतश्च । तिङ्योगे न लोकेति निषेधात् कृद्योगे एव षष्ठी भविष्यतीति सूत्रे कृतिग्रहणं व्यर्थम् । न च "न लोकाव्यये"ति सूत्रे कृदव्ययस्येत्यर्थलाभाय सूत्रे कृद्ग्रहण-मिति वाच्यम्, अव्ययार्थस्य ये कर्त्तृकर्मणी इत्यर्थेन तदुपपत्तेः । न चोभय-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तौ कर्मणीति सूत्रे उभयो. प्राप्तिर्यस्मिन् कृतीति बहुव्रीह्यर्थं कृद्ग्रहणमिति वाच्यम्, एकाचो द्वे इत्यादाविवान्यपदार्थस्याशाब्दत्वेऽपि बहुव्रीह्युपपत्तेः ।

न च भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानामित्यत्र गुणभूते कर्त्तरि षष्ठ्यर्थं कृद्ग्रहणमिति वाच्यम्, गुणभूते कर्त्तरि तृतीयावदुपपत्तेरिति चेन्न, कृदन्त-शक्तिग्रहमात्रप्रयोज्योपस्थितिविषयक्रियायाः कर्तृकर्मणोरेव षष्ठी यथा स्या-दिति ज्ञापनार्थं कृद्ग्रहणस्यावश्यकत्वात् । अत एव—अविवक्षितकर्मककृधातोः भावे क्ते कृतं पूर्वमनेनेति विग्रहे इनि-प्रत्यये पश्चात् कटादिसमभिव्याहारे 'कृतपूर्वी कटमि' त्यत्र न षष्ठी ।

न च सापेक्षत्वात् कथं वृत्तिरिति वाच्यम् ? वृत्तेः पूर्वं कर्मान्वयाभावेन सापेक्षत्वाभावात् । तदुक्तं भाष्ये–यदा वाक्यं न तदा प्रत्ययः, यदा प्रत्ययः सामान्येन तदा वृत्तिरेव । न च नपुंसके भावे इत्यनेन भावे क्ते सिद्धेऽविवक्षित-कर्मत्वेन भावे क्तसाधनयत्नो व्यर्थ इति वाच्यम् ? तत्सूत्रेणापि–अकर्मकेभ्य एव विधानात् । तण्डुलानां पाचकतर इत्यादौ च पाचकादेः पृथक्प्रयोगसत्त्वेन क्रियायाः कृदन्तशक्तिग्रहप्रयोज्योपस्थितिविषयत्वसत्त्वान्न दोष इति भावः ।

आधारोऽधिकरणम्

अत्र सूत्रे 'कारके' इत्यधिकारात् क्रियाजनके एव सूत्रस्य प्रवृत्तिः । तत्रो-पस्थितत्वात् क्रियाया आधारोऽधिकरणसंज्ञको भवति । साक्षात् फलाधारस्य कर्मसंज्ञया, साक्षात् व्यापाराधारस्य कर्तृसंज्ञया बाधात् परम्परयाऽधारस्यैवा-नेन संज्ञा । हर्यादिव्याख्यानात् परम्परा च कर्तृकर्मद्वारिकैव गृह्यते ।

न च कालिकसम्बन्धेन साक्षात् क्रियाधारे कालेऽधिकरणसंज्ञायाश्चारि-तार्थ्यात् परम्पराधारस्य ग्रहणे प्रमाणाभाव इति वाच्यम् ? भाष्यादिव्याख्या-नात् आधारपदे स्वरितत्वप्रतिज्ञानाच्च परम्पराधारस्यैव ग्रहणात् । किञ्च साक्षात्तदाधारत्वे कर्तृत्वमेवाधारस्य स्यात्, यथा–कालः पचति भूतानि । यस्य यद्द्वारा कारकत्वम् तस्य तद्द्वारैव क्रियाऽन्वय इति व्युत्पत्त्या कर्त्रा-द्यन्वयद्वारैवास्य क्रियान्वयो बोध्यः । एवञ्चाधिकरणकारकस्य स्ववृत्तित्वरूप-साक्षात्सम्बन्धेन परम्परया क्रियायामन्वयः । अत एव—अक्षशौण्ड इत्यत्रा-क्षस्य शौण्डेऽन्वयात् समाससिद्धिः । मूले वृक्षः कपिसंयोगीत्यादौ—अस्ति-क्रियायामध्याहृत्य तस्याः स्वकर्तृकपिसंयोगिवृक्षद्वारा मूलवृत्तित्वात् मूलस्या-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धारत्वम्। प्राचा स्ववृत्तिवृत्तित्वरूपपरम्परासम्बन्धेनाधिकरणस्य साक्षात् क्रियायामन्वयः। न चाक्षस्य शौण्डेऽन्वयाभावेनासामर्थ्यात् अक्षशौण्ड इत्यत्र समासो न स्यादिति वाच्यम्, शौण्डस्यासक्तशौण्डे लक्षणयाऽऽसक्तिक्रियाद्वारा सामर्थ्यसत्त्वात्।

वस्तुतस्तु—अक्षेषु शौण्डस्य पुत्राय धनं देहीत्यादौ सप्तमीसिद्धये नवीनमतेऽपि लक्षणाश्रयणस्यावश्यकत्वात् प्राचीनोक्तमेव युक्तमिति भावः।

यस्य च भावेन

ज्ञापकक्रियाश्रयवाचकात् सप्तमीत्यर्थः। अत एव गोपददुह्यमानपदयोरुभयोरपि सप्तमी सिद्धा। ज्ञापकत्वं सप्तम्यर्थस्तस्य च क्रियायामन्वयः, भावलक्षणमित्युक्तेः। गोषु दुह्यमानासु गत इत्यस्मात् गोदोहनज्ञाप्यं गमनमिति बोधः।

काचित् क्रिया स्वाधारकालेनान्यां क्रियां परिच्छिनत्ति—यथा गोषु दुह्यमानासु गत इति। गोषु धोक्ष्यमाणासु गत इत्यादौ—स्वाधारकालाव्यवहितपूर्वकालेनान्यां क्रियां परिच्छिनत्ति। गोषु दुग्धासु गत इत्यत्र स्वाधारकालानन्तरकालेनान्यां क्रियां परिच्छिनत्ति। लक्ष्यलक्षणभावः शब्दबोध्य एव सूत्रप्रवृत्तौ निमित्तम्—अत एव गोषु दुह्यमानासु गत इत्यादौ सप्तमी भवति। भूयोदर्शनादिरूपमानान्तरेण ग्रहणापेक्षत्वे तु—'उदिते आदित्ये तमो नष्टमित्यादावेव स्यात्, न तु पूर्वोक्ते प्रयोगे। यत्र मानान्तरेण ज्ञातस्वरूपस्यार्थस्य कालविशेषादिज्ञापनार्थं प्रयोगः। तत्रैव सूत्रमिदं प्रवर्त्तते, भाष्यस्वरसात्। न च राहूपरागे स्नायात्, विवाहे नान्दीमुखं कुर्यात्, गवां दोहे आगत इत्यादौ सप्तमी न स्यात्, कालविशेषज्ञापनार्थं शब्दप्रयोगाभावादिति वाच्यम्, राहूपरागपदस्य तदधिकरणे काले, विवाहपदस्य विवाहप्राक्काले, गोदोहनाधिकरणे च लक्षणया सप्तमीसिद्धेः।

वस्तुतस्तु—किं ज्ञाप्यं गमनमिति प्रश्ने गोषु दुह्यमानासु गत इत्युत्तरादानात्, कदा गत इति प्रश्ने एव तादृशोत्तरश्रवणाच्च समानकालिकत्वं सप्तम्यर्थः। गोषु दुह्यमानासु इत्यस्मात् गोदोहनसमानकालिकं गमनम्, गोषु धोक्ष्यमाणासु इत्यस्मात् गोदोहनपूर्वकालिकं गमनम्, गोषु दुग्धासु इत्यस्मात् गोदोहोत्तरकालिकं गमनमित्यादि क्रमेण बोधः। एवञ्च क्वचित् समान-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कालिकत्वं क्वचित् स्वपूर्वकालिकत्वं, क्वचिच्च स्वोत्तरकालिकत्वं सप्तम्यर्थः। तथा च राहूपरागसमानकालिकं स्नानम्, विवाहप्राक्कालिकं नान्दीमुखश्राद्धकरणम्, गोदोहनसमानकालिकागमनमिति क्रमेण बोधेऽस्यैव सूत्रस्योदाहरणानीति भावः।

यतश्च निर्द्धारणम्

जातिगुणक्रियासंज्ञाविशिष्टस्य यतः—स्वघटितसमुदायात् स्वेतरसमुदायघटकव्यावृत्तधर्मकरणकं पृथक्करणं तद्वाचकात् षष्ठीसप्तम्यौ स्त इति सूत्रार्थः। सूत्रे यत इत्यस्याभावे यस्य जात्यादिविशिष्टस्य स्वेतरव्यावृत्तधर्मवत्त्वबोधनं तत एवापत्तिः। एवञ्च षष्ठ्यपवादत्ववत् प्रथमापवादत्वस्यापि संभवात् द्विजादित एव सप्तम्यापत्तिस्तद्वारणाय सूत्रे यत इति।

स्वघटितसमुदायावधिक-स्वेतरसमुदायघटक-व्यावृत्तधर्मकरणकपृथक्करणरूप-निर्धारणविषयत्वरूपोऽवयवावयविभावरूपश्च सम्बन्धो विभक्त्यर्थः। निर्धारणविषये तिरोहितावयवभेदविवक्षा न भवति, अत एव कारके इति यदि निर्धारणे सप्तमी तदा कारकेषु इति ब्रूयादिति भाष्यं संगच्छते। मिदचोऽन्त्यादित्यत्रैकवचनं सौत्रत्वात् भवति। 'नृणां नृषु वा द्विजः श्रेष्ठः' इत्यादौ नृपदार्थस्य-स्वघटकत्व-स्वघटकद्विजेतरावृत्तिधर्मवत्त्व–एतदुभयसम्बन्धेन नृपदार्थस्य द्विजपदार्थेऽन्वयः।

न च पुरुषोत्तमः कृष्ण इत्यत्र समासानुपपत्तिः पुरुषपदार्थस्योत्तमेऽन्वयाभावादिति वाच्यम्? नृपदार्थस्य स्वघटकवृत्तित्वस्वघटकेतरावृत्तित्वोभयसम्बन्धेन श्रेष्ठत्वे, एवमुत्तमे चान्वयस्वीकारेणादोषादिति भावः।

पदविधिरिति

विधीयते विधिरिति कर्मणि किः। कर्मणः उक्तत्वात् पदस्य विधिः पदविधिरिति शेषषष्ठ्या समासः। सूत्रे पदविधिसहचरितस्यापि पदविधिशब्देन ग्रहणम्—अत एव सन्नन्तादेकार्थीभाव। पदविधित्वञ्च-पदसंज्ञाप्रयोजकप्रत्ययोत्पत्तिप्रयोजकसंज्ञाविधायकशास्त्रीयोद्देश्यतावच्छेदकरूपावच्छिन्नसम्पादकविधित्वम्। संसृष्टार्थं समर्थमिति भाष्यात् समर्थपदेनैकार्थीभावो गृह्यते। स च विशेष्य-विशेषणभावावगाह्यपस्थितिजनकत्वम्। अत एव 'राजपुरुषः' इत्यत्र राज्ञि न वृद्धादेरन्वयः सापेक्षत्वेनसमासानुपपत्तेः। देवदत्तस्य गुरुकूलमित्यादौ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विग्रहार्थसमासार्थयोरैक्येन गमकत्वात् समासः। एकार्थीभावादेव राजपुरुष इत्यादौ विशेषणपदात् संख्यायाः न प्रतीतिः, संख्याविशेषप्रकारेण तत्तदर्थभाने पृथगुपस्थितेः कारणत्वात्। यथा घटा इत्यादौ बहुत्वेनैव त्रिचतुरादिव्यक्तीनां भानम् तथा वृत्तौ राजत्वादिना–एकानेकव्यक्तिभानं भवति, न तु-एकत्वद्वित्वादिना। शिवस्य भगवतो भक्त इत्यर्थे गमकत्वादेव युगपदेव भगवच्छब्दादण् शिवशब्देन समासश्च भवति। तथा च प्रत्येकशक्तिसहकृतया समुदायशक्त्या विशिष्टोपस्थितिः। जहत्स्वार्था वृत्तिस्तुन पदानामानर्थक्यप्रसंगात्, महाबाहुरित्यत्रात्वानुपपत्तेश्च। भूतपूर्वगत्याऽर्थवत्त्वाश्रयणमयुक्तम्, अगतिकगतित्वात्।

तदुक्तम्—'जहत्स्वार्था तु तत्रैव यत्र रूढिविरोधिनी।' अवयवार्थविरुद्धो यत्र समुदायार्थस्तत्रैव जहत्स्वार्थावृत्तिरिति भावः।

सुप्सुपा

अजाया महिष्याश्च क्षीरमित्यादौ सुबन्तसमुदायस्य समासाभावार्थं सुबित्येकत्वं विवक्षितम्। प्राक्कडारादिति सूत्रात् प्राक्ग्रहणमावर्त्तते, तेन प्राक् समाससंज्ञा भवन्ति, तत्संज्ञाः सन्तोऽव्ययीभावादिसंज्ञका इत्यर्थात् तयोः समावेशः सिध्यति, अन्यथा आकडारत्वात् पर्यायः स्यादिति प्राचां मतम्। परे तु ग्रहं समार्ष्टीतिवत्—उद्देश्यत्वात् सुबित्येकत्वं न विवक्षितम्। किञ्चैकत्वविवक्षायामेकेनैव केनचित् सुबन्तेन किञ्चिदेकं सुबन्तं समस्येत, न त्वन्यैरन्यानि, न च सुबन्तसमुदायस्य समासापत्तिरिति वाच्यम्, सुबित्यत्र जातिविवक्षया स्वाङ्गसमुदायस्य स्वाङ्गग्रहणेन ग्रहणाभाववत् सुबन्तसमुदायस्य सुबन्तादिग्रहणेनाग्रहणात् समासाप्रवृत्तेः। अत एव प्रतिप्रत्ययं विभक्तिसंज्ञेति पक्षे प्रथमयोरित्यत्र विभक्तिसमुदायस्य विभक्तिग्रहणेनाग्रहणात् प्रथमयोः प्रत्यययोरेव ग्रहण प्राप्नोतीति कैयटोक्तं संगच्छते, इति भावः।

प्रथमानिर्दिष्टमिति

ननु समासगतेऽन्तर्वर्तिविभक्त्याश्रये प्रथमान्तत्वे कष्टश्रित इत्यत्र श्रितशब्दस्य पूर्वनिपातापत्तिः, निर्दिष्टपदञ्च सूत्रे व्यर्थं स्यात्, तत्सामर्थ्यात् समाससंज्ञाविधायके शास्त्रे इत्यर्थः समासपदस्य कर्त्तव्यः। न चैवं राज्ञः कुमारीं श्रितः, राजकुमारीश्रित इत्यत्र कुमारीशब्दस्य पूर्वनिपातापत्तिः द्वितीयाश्रितेति सूत्रे द्वितीयायाः प्रथमानिर्दिष्टत्वादिति वाच्यम्? अप्रधानमुपसर्जनमिति महा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संज्ञाकरणेन समासशास्त्रे प्रथमानिर्दिष्टमप्रधानत्वसमानाधिकरणोपसर्जनपदवत्, इत्यर्थेऽप्रधानत्वस्य ससम्बन्धिकत्वात् यं प्रति यदप्रधानं तम्प्रति तदुपसर्जनमित्यर्थेनादोषात्। प्रकृते कुमारीशब्दे राजनिरूपितप्राधान्यस्यैव सत्त्वान्न तस्य पूर्वनिपातः।

न च कायनिरूपिताप्राधान्यस्य पूर्वपदार्थेऽभावात् पूर्वकायाद्यसिद्धिरिति वाच्यम् ? समासशास्त्रस्थप्रथमानिर्दिष्टे शब्दगताप्रधानत्वस्याश्रयणेनादोषात्। पुत्रेण सहागतः पितेत्यत्र तृतीयान्तार्थस्य शाब्दगुणान्वयित्वाभावरूपाप्राधान्येऽपि तत्समभिव्याहृतप्रथमाद्यन्तार्थे तदधीनत्वरूपाप्राधान्यप्रतीतेः। अत एव 'समकक्षयोरप्येकस्य परेण सहागन्तव्यम्' इत्युक्ते दुःखं दृश्यते। अत एव भाष्ये यं शब्दं प्रति यत्प्रथमानिर्दिष्टमप्रधानं तं शब्दं प्रति तत्प्रथमानिर्दिष्टवाच्यं पदमुपसर्जनमित्युक्तम्। यत्तु–अर्थगताप्राधान्येनान्वर्थत्वेऽपि पूर्वकायादौ न दोषः, यत्र तादृशार्थः सम्भवति तत्रान्वर्थसंज्ञाश्रयणम्, अन्यत्र पूर्वकायादौ विधानसामर्थ्यात्तन्निरपेक्षा। यथा स्वादीनां कर्मप्रवचनीयत्वम् तथा प्रथमानिर्देशसामर्थ्यात् पूर्वादीनां संज्ञा भविष्यतीति कैयटोक्तिश्चिन्त्या, निर्विभक्तिकस्योच्चारणासम्भवेन तत्सामर्थ्याभावात्। प्राथम्यादन्वितार्थकत्वाल्लघुत्वाच्च प्रथमैवोच्चारिता, इत्यस्य वक्तुं शक्यत्वादिति भावः।

एकविभक्तीति

विग्रहवाक्येऽनियतविभक्त्यपेक्षया नियतविभक्तिकस्य, एकविभक्ति चापूर्वनिपाते इत्यनेनोपसर्जनसंज्ञा विधीयते। 'निष्कौशाम्बि'रित्यत्र कौशाम्ब्याःनिष्क्रान्तेन, निष्क्रान्ते इत्यादिक्रमेण परिनिष्ठितविभक्त्यापि समासे तस्यानियतविभक्तिकतया तदपेक्षया कौशाम्ब्याः नियतविभक्तिकत्वादुपसर्जनसंज्ञा परिनिष्ठितविभक्त्या समासे सूत्रमिदं गमकम्। अनेकमन्यपदार्थे इति सूत्रस्थभाष्यात् प्रथमान्तेन समास इत्यपि पक्ष इति।

वस्तुतस्तु—समासापेक्षया नियतविभक्तिकस्यानेनोपसर्जनसंज्ञा। 'निष्कौशाम्बि' रित्यत्र समासस्यानियतविभक्तिकत्वेन तदपेक्षया कौशाम्ब्या नियतविभक्तिकत्वादुपसर्जनसंज्ञा। न च 'राज्ञः कुमारी राजकुमारी' इत्यत्र समासापेक्षया कुमार्याः नियतविभक्तिकत्वेन संज्ञापत्तिरिति वाच्यम् ? परिनिष्ठितविभक्त्यापि समासस्य सत्त्वेन नियतविभक्तिकत्वाभावात्। अत एव 'चित्रगुरि'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्यत्र गोशब्दस्यानेनोपसर्जनत्वं स्वीकृत्यानेकग्रहणं भाष्ये प्रत्याख्यातम्। न चैवं बहूनां समासो न स्यादिति वाच्यम् ? तद्धितार्थ इत्यनेनोत्तरपदे द्विगुविधानात्तदुपपत्तेः, अजायाः महिष्याश्च क्षीरमित्यादौ-अनभिधानात् समासाभावः। तदुक्तं भाष्ये—अनेकवचनमुपसर्जनार्थम्, न वा एकविभक्तित्वादिति।

वार्त्तिककृताऽप्रधानमुपसर्जनमित्यन्वर्थत्वानुक्तेस्तद्रीत्या प्रयोजनवार्त्तिकम्, न वेति खण्डनम्। भाष्यरीत्या तु बहुव्रीहिसंज्ञाविषये एकविभक्ति, इत्यस्य न प्राप्तिः। प्राचीनमते 'चित्रगुरि'त्यत्र द्वयोरपि नियतविभक्तिकत्वेनोपसर्जनसंज्ञानुपपत्तिः। किञ्च सभार्य इत्यत्र सहशब्दस्याव्ययतया विभक्तिमात्राभावेन, लुकानुत्पत्तेरेवान्वाख्यानेन चानियतविभक्तिकत्वाभावादुपसर्जनसंज्ञाया अभावेन ह्रस्वानुपपत्तिः। मन्मते समासस्यानियतविभक्तिकत्वेन तदपेक्षया भार्याशब्दस्य नियतविभक्तिकत्वान्न दोष इति दिक्।

षष्ठ्यन्तयोरिति

ननु राज्ञः कुमार्या इति परिनिष्ठितविभक्त्या समासे कुमार्या अपि पूर्वनिपातापत्तिः, कुमारीशब्दस्यापि षष्ठ्यन्तत्वेन प्रथमानिर्दिष्टत्वादिति चेन्न—षष्ठ्यन्तयोः समासेऽर्थाभेदात् प्रधानस्यापूर्वनिपात इति भाष्येण समाधानात्। अर्थस्य प्रधानस्याभेदात् समस्यमानराजपदार्थनिरूपितसम्बन्धाभावात्। षष्ठीत्यादिसूत्रे येन सुबन्तेन समासस्तदर्थनिरूपितसम्बन्धाद्यर्थकमेव षष्ठ्याद्यन्तं गृह्यते तदेव च तत्र प्रथमानिर्दिष्टमिति भावः। तदुक्तं कैयटेन'—राज्ञः पुरुषस्ये'त्यत्र राजापेक्षया पुरुषः प्रधानमेव, नासौ भिद्यते राजापेक्षया न व्यतिरिच्यते इत्यप्रधानस्यैव पूर्वनिपात इति। अर्थात्—अप्रधानषष्ठ्यन्तमेव प्रथमानिर्दिष्टपदेन गृह्यते, इति दिक्।

गोकुलमिति

ननु "गोस्त्रियोः" इत्यस्योपसर्जनं यो गोशब्दः उपसर्जनं यत् स्त्रीप्रत्ययान्ततदादि-तदन्तस्य प्रातिपदिकस्य ह्रस्व इत्यर्थे गोकुलमित्यत्र राजकुमारीपुत्र इत्यत्र च ह्रस्वापत्तिरिति चेन्न, अप्रधानमुपसर्जनमिति सम्बन्धिशब्दावेतौ, तत्र सम्बन्धादेतद्गन्तव्यं यं प्रति यदप्रधानं तस्य चेत् सोऽन्तो भवतीति भाष्यात् यत्प्रथमा निर्दिष्टं तद्घटितसमासस्याप्रधानशब्दोऽन्तो भवतीत्यर्थेनादोषात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न चैवं 'कुक्कुटमयूर्यौ' इति द्वन्द्वे एकविभक्तीत्यनेनोपसर्जनसंज्ञायां ह्रस्वापत्तिः, अप्रधानस्यैवोपसर्जनसंज्ञेति मतेऽपि—उद्भूतावयवभेदसाहित्यम्प्रति मयूरीपदार्थस्याप्रधानत्वात्, सर्वत्र द्वन्द्वे साहित्यमेव विशेष्यमिति "चार्थे द्वन्द्वः" इति सूत्रभाष्यात् प्रतीयते इति वाच्यम् ? 'द्वन्द्वे न" इति वचनारम्भेणादोषात् । अत एव 'कुमारीमिच्छन् ब्राह्मणः कुमारी'त्यत्र ह्रस्वो न, शाब्रीयस्यैवोपसर्जनस्य तत्र ग्रहणादिति भावः ।

अधिहरि

ननु लुगपेक्षयाऽन्तरङ्गत्वात् इत्संज्ञायाः पूर्वं प्राप्त्या 'हरि + ङि + अधी'त्यलौकिकविग्रहप्रदर्शनमनुचितमिति चेन्न, फलविशेषाभावेऽप्यन्तरङ्गानपि विधीनिति न्यायप्रवृत्त्या मूलोक्तोपपत्तेः । न च समासेऽधिशब्दस्य पूर्वनिपातदर्शनेन तदर्थप्रदर्शकविग्रहेऽप्यधिशब्दस्य पूर्वं प्रयोग उचित इति वाच्यम् ? ङ्यघ्योः समानार्थत्वध्वनन्नाय ङ्युत्तरमेवाधिशब्दस्य प्रयोगात् ।

न च यद्विभक्त्यर्थवाचकाव्ययेन सुबन्तस्य समासस्तद्विभक्त्यैव यत्सुबन्तं तस्य सूत्रे ग्रहणात् निपातेनाधिना सप्तम्यर्थस्योक्तत्वात् कथं हरिशब्दात् सप्तमीति वाच्यम् ? सूत्रे वचनग्रहणेन तदभिहितत्वेऽपि सप्तमीसिद्धेः । तिङ्कृत्तद्धितसमासैरिति परिगणनाच्चेति भावः ।

विधानसामर्थ्यात्

ननु 'समया ग्रामम्' आरात् वनादि'त्यादौ समीपार्थकत्वात् कथं न समास इति चेन्न, समयानिकषाशब्दयोगे द्वितीयायाः आराच्छब्दयोगे च पञ्चम्याः विधानाभावेऽपि तत्तत्योगे षष्ठीं कृत्वाऽव्ययीभावसंज्ञाकार्या तावताऽपि रूपसिद्धौ द्वितीयापञ्चमीविधानेन समासाप्रवृत्तेः ।

वस्तुतस्तु मध्यार्थकसमयाशब्दयोगे द्वितीयाविधानस्य दूरार्थकाऽऽराच्छब्दयोगे पञ्चमीविधानस्य च चारितार्थ्यात् प्राचीनोक्तमयुक्तम्, न हि तत्र समासप्राप्तिः, समीपमात्रवाचित्वाभावात् । 'अब्भक्ष' न्यायेन विभक्त्यर्थसमीपादिमात्रवृत्त्यव्ययस्यैव सूत्रेण समासविधानादिति भावः ।

यथाऽसादृश्ये

यथार्थत्वादेव समासे सिद्धेऽसादृश्ये एव यथाशब्दः समस्यते इति नियमार्थं सूत्रम् । तेन 'यथा हरिस्तथा हरः' इत्यत्र समासो न भवति । न च तथा हर

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्यत्र यथाशब्दाभावात् समासः कुतो नेति वाच्यम्, सादृश्यप्रतियोगिवाचकेनैव तद्बोधकाव्ययस्य समासविधानात्। सामान्यस्य भेदको यो विशेषस्तद्रूपे प्रकारे थाल्प्रत्यये कृते यद्विशेषवान् हरिस्तद्विशेषवदभिन्नो हर इति बोधे यत्तत्च्छब्दाभ्यां हरिहरयोरेकत्वावगमात्, उपमानत्वप्रतीतिर्भवति। सूत्रेऽपि सादृश्यशब्देनोपमानत्वं गृह्यते। सूत्रे प्रकारशब्देन सादृश्यस्य ग्रहणे यत्सादृश्यवान् हरिः तत्सादृश्यवान् हर इत्येव बोधः स्यान्न तु पूर्वोक्तप्रकारः। इति प्राचीनमतम्।

परे तु यथाशब्दः सुबन्तेन समस्यते सादृश्ये द्योत्ये नेति सूत्रार्थः। यथाशक्ति, यथाबलम्, इति सूत्रोदाहरणम्। अत एव भाष्ये—असादृश्ये इति किमर्थम्, 'यथा देवदत्तस्तथा यज्ञदत्तः' इत्युक्तम्, न तु सूत्रमेव किमर्थमित्युक्तम्। एवञ्च विध्यर्थमिदं सूत्रम्, न नियमार्थम्। यथार्थत्वान्न समासप्राप्तिः,सूत्रगृहीताव्ययेन तेन समासविधानाभावात्। न च थालानिष्पन्नस्य यथाशब्दस्य सर्वथा सादृश्यद्योतकत्वेन सूत्रोदाहरणासंभव इति वाच्यम्? सूत्रारम्भेण—अव्युत्पन्नस्य वीप्सा-योग्यता-पदार्थानतिवृत्तिबोधकस्यैव यथाशब्दस्य सूत्रे ग्रहणेनादोषात्। यथाशब्द उपमानत्वं द्योतयतीति सिद्धान्तात् यद्विशेषवान् देवदत्तस्तद्विशेषवदभिन्नो यज्ञदत्त इति बोधोत्तरम्—उपमानदेवदत्ताभिन्न उपमेयो यज्ञदत्त इति बोधे पूर्वपदार्थप्राधान्याभावेन समासाप्राप्तौ सूत्रमिदं व्यर्थम् तथापि प्रसिद्धत्वात् प्रकारवचनस्यैवात्र ग्रहणे तत्सामर्थ्यात् 'द्विमुनि' इत्यादाविव पूर्वपदार्थप्राधान्याभावेऽपि समासः स्यात्तद्वारणाय सूत्रेऽसादृश्ये इति।

न च यथाबलमित्युदाहरणे थालन्तस्यैव ग्रहणमस्तु सादृश्यसम्पत्तीत्यनेन समासोऽस्तु, इदं सूत्रञ्च मास्तु, पूर्वसूत्रे यथाग्रहणञ्च मास्त्विति वाच्यम्? एतत् सूत्रारम्भेण यथाबलमित्यादौ प्रकारवाचि-थालन्तस्याप्रयोगात्। प्रकारार्थे थालः साधुत्वापत्तेः, पदार्थानतिवृत्तिवीप्सादावसाधुत्वापत्तेश्च।

कैयटमतविचारः—'यथार्थे यदव्ययमि' ति पूर्वसूत्रेण समासे सिद्धे सादृश्यप्रतिषेधार्थत्वादस्यारम्भस्येति कैयटोक्तिर्न युक्ता, सूत्रगृहीताव्ययेन तेन सूत्रेण समासविधानाभावात्। नियमत्वापेक्षया—एतादृशार्थज्ञापकत्वस्यौचित्यात् पूर्वसूत्रे यथार्थशब्देन सादृश्यग्रहणं चरितार्थम्। न च गुणभूतसादृश्यग्रहणार्थं सूत्रे सादृश्यग्रहणमिति वाच्यम्? लक्ष्यानुरोधेन प्रधानन्यायाप्रवृत्त्येष्टसिद्धेः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यथा योग्यताया यथार्थत्वेऽपि रूपस्य योग्यम्--'अनुरूपमि'त्यादौ तद्वदर्थकेनापि समासस्तद्वदिति भावः ।

विभाषा-ननु एकार्थीभावे समासस्य व्यपेक्षायां वाक्यस्य च सिद्धौ 'विभाषे'ति सूत्रं व्यर्थम्, एकार्थीभावे एव समाससंज्ञादिविकल्पस्तु न,न च संज्ञायाः भावाभावाविष्येते इति भाष्यविरोधात् । एवं समासनिषेधसूत्राणि व्यर्थानि, तत्र व्यपेक्षापक्षस्यैव स्वीकारात् तथा नित्यं क्रीडेत्यत्र नित्यग्रहणं व्यर्थम्, तत्रैकार्थीभावस्यैव स्वीकारादिति चेन्न, लक्षणैकचक्षुष्कान् मन्दान् प्रति क्वैकार्थीभावो नित्यः, क्व पाक्षिकः, क्व नास्तीत्यर्थबोधनार्थं सर्वेषामावश्यकत्वात् ।

लक्ष्यैकचक्षुष्कं प्रति नास्ति तेषां प्रयोजनम् । तथा च विशेषणीभूतैकार्थीभावस्य विकल्पादिबोधकानीमानि । तदुक्तं भाष्ये-एकया वृत्तिर्विभाषा, परया वृत्तिविषयेऽनित्योऽपवाद इति भावः ।

एतत्सामर्थ्यादिति

"सह सुपे"ति सूत्रात् प्राक् विभाषाधिकारे कर्त्तव्येऽत्रैतदधिकारसामर्थ्यात्—इतः प्राचीनानां नित्यसमासत्वं बोधयति । न च "सह सुपे" त्यस्यापि नित्यसमासत्वापत्तिरिति वाच्यम्, 'विस्पष्टं पटुः विस्पष्टपटुरि'त्यत्र विग्रहप्रदर्शनपरभाष्यप्रामाण्येन तस्यानित्यत्वात् । किञ्च "सह सुपे" ति समासमुद्दिश्य—"अव्ययं विभक्ती"त्यादिनाऽव्ययीभावसंज्ञाविधानेन सिद्धेऽव्ययं विभक्तीत्यादिना समासविधानारम्भेण च तस्यानित्यत्वम् ।

न चोपसर्जनसंज्ञाविधानार्थं समाससंज्ञाविधानमावश्यकमिति वाच्यम्? प्रथमा निर्दिष्टमित्यस्य समासत्वव्याप्यसंज्ञाविधायके शास्त्रे इत्यर्थस्वीकारेणादोषात् । "उपपदमतिङ्" "कर्तृकरणे कृता" 'आख्यातमाख्यातेने"त्यादौ समरूपोद्देश्याप्रसिद्धया,"अनेकमन्यपदार्थे"इत्यादौ त्र्यादिपदघटितसमासरूपोद्देश्याप्रसिद्धया च तेषु समाससंज्ञाविधानस्यावश्यकत्वेनार्थाधिकारानुरोधात् सर्वत्र तस्य विधेयसमर्पकत्वमिति भावः ।

समासान्ताः—सूत्रे समासपदम् समाससम्बन्ध्यलौकिकविग्रहवाक्यपरम्, एवमव्ययीभावादिपदान्यपि तत्सम्बन्ध्यलौकिकविग्रहवाक्यपराणि । तथा चालौकिकविग्रहवाक्यस्य चरमावयवाः समासान्ताः प्रत्यया भवन्ति । अत एव 'बहुकुमारीक' इत्यादौ 'गोस्त्रियो'रिति ह्रस्वो न । 'उपशरदमि'त्यत्रादन्ताव्य-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitized by eGangotri

यीभावत्वादम् सिध्यति । एवञ्चालौकिकविग्रहवाक्ये समाससंज्ञा समकालमेव समासान्ताः प्रत्ययाः ।

न च समाससंज्ञाप्रयोज्यकार्यान्तरप्रवृत्तेः पूर्वं समासान्ते तत्संनियोगशिष्टाद्युदात्तत्वे तदेकवाक्यतापन्ने पूर्वस्य निघाते च कृते पूर्वपदस्योदात्तस्वरितयोगित्वाभावेन बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वराप्राप्तौ ङ्यश्चित्त्वं व्यर्थमिति वाच्यम्, ङ्यश्चित्त्वसामर्थ्येन समासान्तविधौ आद्युदात्तश्चेत्यस्याप्रवृत्तिबोधनात् । अत एव 'समृद्धपुरो राजे'त्यत्र पूर्वपदप्रकृतिस्वरसिद्धिः । समासान्तप्रत्ययस्य समुदायावयवत्वादेव—उपशरदमित्यत्र—अव्ययानां भमात्रे इति टिलोपाभावः, पूर्वभागस्याव्ययीभावत्वाभावेनानव्ययत्वात् ।

यत्तु—समासान्ता इत्यत्र समासपदस्य समासार्थविग्रहवाक्यस्थोत्तरपदे लक्षणा, तथा चालौकिकविग्रहवाक्यस्योत्तरपदस्यावयवाः समासान्ता इत्युक्तं कैयटेन । अत एवोत्तरपदावयवत्वमित्यपि भाष्यकारस्य मतमिति ।

अत एव 'द्विपुरी'त्यादौ स्त्रीत्वमिति, तन्न, उत्तरपदावयवत्वस्वीकारे फलाभावात् । लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति भाष्यात् 'द्विपुरी'त्यादौ स्त्रीत्वस्य लोकतः सिद्धेः । अत एव परवल्लिङ्गमिति सूत्रसत्त्वेऽपि 'द्विनावमि'त्यादौ नपुंसकत्वसिद्धिः । किञ्च, समासस्यान्तोदात्तत्वमुत्तरपदस्य वा, इति विकल्पे—"आद्ये इदम्प्रथमकाः" इत्यादौ कपोऽन्तोदात्तत्वापत्तिमुक्त्वा—"अन्त्ये अनृचः" इत्यत्रान्तोदात्तत्वासिद्धिरित्युक्तं भाष्ये । यद्युत्तरपदावयवः स्यात्तदा नञ्सुभ्यामिति सूत्रेण चकारस्यान्तोदात्तत्वं स्यादेवेति भाष्यासंगतिः । न च कृतद्वन्द्वानां विभक्तौ परत एकशेषः—इति पक्षे भृक् च भृक् च—भृचौ, असारूप्यादेकशेषो न प्राप्नोतीति भाष्यासंगतिः समुदायावयवत्वेऽसारूप्याभावादिति वाच्यम्, तत्प्राक्भागस्य विभक्तिपरत्वाभावेन, विशिष्टस्य सरूपवत्त्वाभावेन च भाष्यविरोधाभावात् ।

न च द्वन्द्वावयवानामानर्थक्यात् कथमेकशेषस्य प्रवृत्तिशंका कृतेति वाच्यम्, द्वन्द्वावयवानामर्थवतामेवैकशेष इत्यर्थे प्रमाणाभावात् । विशिष्टरूपोपादानाभावेनार्थवत्परिभाषाया अप्रवृत्तेश्चेति भावः ।

इति 'भागलपुर'मण्डलान्तर्गत-'सिमरा'-ग्रामवास्तव्येन श्रीमन्मालिकशर्मात्मजेन शुकदेवझाशर्मणा संगृहीतं कारकाव्ययीभावप्रकरणम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आचार्य-पण्डित-श्रीशुकदेवझारचित-पुस्तकानि

• •

महाभाष्यादर्शः	१.५०
भूषणसार-प्रकाशः	१.००
परिभाषेन्दुप्रकाशः	१.५०
लघुशब्देन्दुशेखर-प्रकाशः [प्रथमभागः]	१.००
मनोरमारत्नप्रकाशः	१.५०
लघुमञ्जूषाप्रकाशः	यन्त्रस्थः
व्युत्पत्तिवादप्रकाशः	,,
वटुरञ्जनीप्रकाशः	,,

• •

पुस्तक-प्राप्ति-स्थानम्

मास्टर खेलाड़ीलाल संकटाप्रसाद

संस्कृत पुस्तकालय

पो० बा० नं० ९७, कचौड़ीगली,

वा रा ण सी-१

Kirtikant Sharma Collection, Najafgarh